नचात्रविलंबकार्य्यमित्याह परिशोचतीति रोदतीत्यर्थः १५ वज्रस्यनिष्पेषो निर्घातोयथा निष्ठुरस्तीव्रोनादो भवतितथा भूतंनादंव्यनदत् सामान्य
व्यशेषतयावाप्यव्यापकत्वमोदनंपाकंपचतीतिवत् अतिनिष्ठुरंवाकामकरोदित्यर्थः वैहायसः आकाशेस्थितः २१ सत्वात्मिकांसत्वगुणमयीं

परिशोचतितेमाताकुररीवगतप्रजा पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा १५ प्रभाष्यैवंददौविद्यांप्रद्युम्नायमहा
त्मने मायावतीमहामायांसर्वमायाविनाशिनीं १६ सचशंबरमभ्येत्यसंयुगायसमाह्वयत् अविषह्यैस्तमाक्षेपैःक्षिपन्
संजनयन्कलिं १७ सोधिक्षिप्तोदुर्वचोभिःपादाहतइवोरगः निश्चक्रामगदापाणिरमर्षात्ताम्रलोचनः १८ गदामाविध्यत
रसाप्रद्युम्नायमहात्मने प्रक्षिप्यव्यनदन्नादंवज्रनिष्पेषनिष्ठुरं १९ तामापतंतींभगवान्प्रद्युम्नोगदयागदां अपास्यशत्र
वेक्रुद्धःप्राहिणोत्स्वगदांनृप २० सचमायांसमाश्रित्यदैतेयींमयदर्शितां मुमुचेस्त्रमयंवर्षंकार्ष्णौवैहायसोऽसुरः २१
ततोगुह्यकगंधर्वपैशाचोरगराक्षसीः प्रायुंक्तशतशोदैत्यःकार्ष्णिर्व्यधमयत्ताः २३ १ बध्यमानोस्त्रवर्षेणरौक्मिणेयो
महारथः सत्वात्मिकांमहाविद्यांसर्वमायोपमर्द्दिनीं २२ निशातमसिमादायसकिरीटंसकुंडलं शंबरस्यशिरःकायात्ताम्रश्म
श्र्वोजसाहरत् २४ आकीर्य्यमाणोदिविजैःस्तुवद्भिःकुसुमोत्करैः भार्ययांबरचारिण्यापुरंनीतोविहायसा २५ अंतःपु
रवरंराजन्ललनाशतसंकुलं विवेशपत्न्यागगनाद्विद्युतेवबलाहकः २६ तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससं
प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननं २७

प्रायुंक्तेत्युत्तरस्यानुषंगः २२ तामायाः व्यधमयत् व्यनाशयत् २३ ताम्राणिश्मश्रूणियस्मिन् तत् ओजसाबलेन २४ विद्युतासहबलाहकोमेघइव
२६ २७

प्रसिद्धः कामशत्रुः शंबरः तमात्मनः शत्रुं विदित्वा समुद्रे प्रास्य प्रक्षिप्य गृहमगादिति ३ निर्जगार गिलितवान् ४ स्वधितिना शस्त्रि
कया अवद्यन् खण्डितवन्तः ५ त्वं कामो यतस्त्वमभर्त्तेति उत्पन्नेति श्रीकृष्णात् रुक्मिण्या उत्पन्न इति ६ यशस्विनी पतिव्रता भर्तृदेहप्राप्तिं

तं शंबरः कामरूपी हृत्वा तोकमनिर्दशम् । स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहम् ३ तं निर्जगार बलवान् मीनः सोऽप्य
परैः सह । वृतो जालेन महता गृहीतो मत्स्यजीविभिः ४ तं शंबराय कैवर्त्ता उपाजह्रुरुपायनम् । सूदा महानसं नीत्वाऽवद्य
न् स्वधितिनाद्भुतम् ५ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् । नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः ६ बालस्य तत्त्वमुत्प
त्तिं मत्स्योदरनिवेशनम् । सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ७ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती । निरूपिता शंबरेण
सा सूपौदनसाधने । कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदार्भके ८ नातिदीर्घेण कालेन स कार्ष्णि रूढयौवनः । जनयामास नारी
णां वीक्षन्तीनां च विभ्रमम् ९ सा तं पतिं पद्मदलायतेक्षणं प्रलम्बबाहुं नरलोकसुन्दरम् । सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपत
स्थे रतिरंग सौरतैः १० तामाह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा । मातृभावमतिक्रम्य वर्त्तसे कामिनी यथा ११ रतिरु
वाच भवान्नारायणसुतः शंबरेण हृतो गृहात् । अहं तेऽधिकृता पत्नी रतिः कामो भवान् प्रभो १२ एष त्वानिर्दशं सिंधावक्षि
पच्छंबरोऽसुरः । मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान् प्रभो १३ तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः । मायाशतविदं त्वं
च मायाभिर्मोहनादिभिः १४

प्रतीक्षती ईक्षमाणा ७ ८ तं शिशुं कामदेवं बुद्ध्वा ९ विभ्रमं संमोहं १० अंग हे राजन् सौरतैर्भावैः उपतस्थे अभजत् ११ अधिकृता
पत्नी यत्र हेतुः रतिरहं भवान् काम इति १२ दुर्जयत्वे हेतुः मायाशतविदमिति कथं तर्हि हंतव्यस्तत्राह मायाभिरिति १४

अतिमोदर्य्येण प्रद्युम्नमनुवर्णयति यमितिपिताश्रीकृष्णस्तत्सरूपेप्रद्युम्नेनिजआत्मीयईशभर्त्तेतिभावोभावनायासांतास्तुतन्मातरःकृष्ण
पत्न्योपिरहसिनिरूढभावासन्त्योयमभजन्नितियदात्तत्खलुनचित्रंकथं सतिस्मरेस्मर्यमाणत्वेनैवक्षोभकेकामेस्तविषयेसति अत्ताणामिंद्रियाणां
विषयेतस्मिन् किंचरमास्पदंश्रीकृष्णस्यबिंबंश्रीमूर्त्तिस्तस्यबिंबेप्रतिबिंबेपुत्रेतदाकिंतुवक्तव्यंअन्यनार्य्योभेजुरिति ४० इतिदशमेपंचपंचाशत्तमः
५५ षट्पंचाशत्तमेमिथ्याभियोगेमणिमाहरत् कन्यांजांबवतआपकृष्णःसत्राजितस्ततःपुत्रादिकामसौख्यस्यनिष्ठामुक्त्वातिंचचलां अर्थस्यानर्थ

यंवैमुहुःपितृसरूपनिजेशभावास्तन्मातरोयदभजन्रहरूढभावाः चित्रंनतत्खलुरमास्पदबिंबबिंबेकामेस्मरेऽक्ष
विषयेकिमुतान्यनार्य्यः ४० इतिश्रीभागवतेमहापुराणेदशमस्कंधेप्रद्युम्नचरितवर्णनंनामपंचपंचाशत्तमोऽध्यायः ५५
श्रीशुकउवाच सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः स्यमंतकेनमणिनास्वयमुद्यम्यदत्तवान् १ राजोवाच सत्राजितः
किमकरोद्ब्रह्मन्कृष्णस्यकिल्बिषं स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः २ श्रीशुकउवाच आसीत्सत्राजितःसूर्य्योभक्त
स्यपरमःसखा प्रीतस्तस्मैमणिंप्रादात्सूर्य्यस्तुष्टःस्यमंतकं ३ सतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः प्रविष्टोद्वारकांराज
न्तेजसानोपलक्षितः ४

तामाहस्यमंतहरणादिना २ सत्यभामाजांबवत्योर्विवाहप्रस्तावायस्यमंतकाख्यानमाहसत्राजितमिति अकारांतश्चिच्चतकारांतो
प्यन्वयानुसारेणदृष्टव्यः कृतापराधस्तच्छांतयेस्वयमेवोद्यमंकृत्वामणिनासहप्रादादिति भक्तस्यसत्राजितःसूर्य्यःस्वाम्यपिसखेवा
सीदित्यर्थः सचतुष्टस्तस्मैस्यमंतकंनाममणिंप्रादात् प्रीतःस्निग्धः नोपलक्षितःसत्राजितोसावित्यविज्ञातः ४ रामः
१९

नीलाश्चवक्राश्चयेअलकास्तएवालयस्तैर्ह्रीताःलज्जिताः २८ श्रीकृष्णोभवतीत्यवधार्य्यसस्त्रीरत्नंस्त्रीषुरत्नंश्रेष्ठारतिस्तत्सहितं २९ सुतं
स्मरंत्याहकोन्वयमितिनरवैदूर्यःपुरुषेषुश्रेष्ठः ३१ एतेनतुल्यंवयोरूपंचयस्यसः ३२ भवेदितितस्यस्वपुत्रत्वंसंभावयंत्याहकथं

स्वलंकृतमुखांभोजनीलवक्रालकालिभिः कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह २८ अवधार्य्यशनैरी
षद्वैलक्षण्येनयोषितः उपजग्मुःप्रमुदिताःसस्त्रीरत्नंसुविस्मिताः २९ अथतत्रासितापांगीवैदर्भीवल्गुभाषिणी
अस्मरत्स्वसुतंनष्टंस्नेहस्नुतपयोधरा ३० कोन्वयंनरवैदूर्य्यःकस्यवाकमलेक्षणः धृतःकयावाजठरेकेयंल
ब्धात्वनेनवा ३१ ममचाप्यात्मजोनष्टोनीतोयःसूतिकागृहात् एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ३२ कथं
त्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः आकृत्यावयवैर्गत्यास्वरहासावलोकनैः ३३ सएववाभवेन्नूनंयोमेगर्भेधृतो
ऽर्भकः अमुष्मिन्प्रीतिरधिकावामस्फुरतिमेभुजः ३४ एवंमीमांस्यमानायांवैदर्भ्यांदेवकीसुतः देवक्यानकदुंदुभ्यामु
त्तमश्लोकआगमत् ३५ विज्ञातार्थोपिभगवांस्तूष्णीमासीज्जनार्द्दनः नारदोकथयत्सर्वंशंबराहरणादिकं ३६ तच्छ्रु
त्वामहदाश्चर्य्यंकृष्णांतःपुरयोषितः अभ्यनंदन्बहूनब्दान्नष्टंमृतमिवागतं ३७ देवकीवसुदेवश्चरामकृष्णौतथास्त्रियः
दम्पतीतौपरिष्वज्यरुक्मिणीचययुर्मुदं ३८ नष्टंप्रद्युम्नमायांतमाकर्ण्यद्वारकौकसः अहोमृतइवायातोबालोदिष्ट्येतिहाब्रु
वन् ३९

त्विति ३३ तदेवाधिक्यंसंभावयति सएवेतिदेवक्यानकदुंदुभ्यांदेवक्यानकदुंदुभिभ्यामित्यर्थः ३५ ३६ श्रीहरयेनमः श्रीः

आच्छिद्य आहृत्य गृहीत्वा १४ १५ अजपन् उपांशु अवोचन् १६ २३ क्रव्यार्थे आमिषार्थे २४ अष्टविंशाहं अष्टाविंशतिश्च अहानि

२०

प्रसेनंसहयंहत्वामणिमाच्छिद्यकेसरी गिरिंविशन्जांबवतानिहतोमणिमिच्छता १४ सोपिचक्रेकुमारस्यम
णिंक्रीडनकंबिले अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत १५ प्रायःकृष्णेननिहतोमणिग्रीवोवनंगतः भ्राताम
मेतितच्छ्रुत्वाकर्णेकर्णेजपन्जनाः १६ भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः १७
वे हतंप्रसेनमश्वंचवीक्ष्यकेशरिणावने तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः १८ ऋक्षराजबिलंभीममंधेनतमसावृतं
एकोविवेशभगवानवस्थाप्यबहिःप्रजाः १९ तत्रदृष्ट्वामणिश्रेष्ठंबालक्रीडनकंकृतं हर्तुंकृतमतिस्तस्मिन्नवतस्थेऽर्भ
कांतिके २० तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवान् तच्छ्रुत्वाभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः २१ सवैभगवता
तेनयुयुधेस्वामिनात्मनः पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित् २२ द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः आयुधा
श्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव २३ आसीत्तदष्टविंशाहमितरेतरमुष्टिभिः वज्रनिष्पेषपरुषैरविश्रममहर्निशं २४
कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः क्षीणसत्वःस्विन्नगात्रस्तमाहातीवविस्मितः २५

दिनानियस्मिन्तत् अष्टविंशात्यहंविंशतिशहेतिलोपश्छांदसः वज्रस्यनिष्पेषोनिर्घातस्तद्वत्परुषैर्निष्ठुरैः २४ श्रीकृष्णस्यमु रामः
ष्टीनांविनिष्पातेनाघातेनविनिष्पिष्टानिविश्लिष्टान्यंगानांउरूणिबंधनानिसंधिस्थानानियस्यसः २५

दीव्यते क्रीडते सूर्योयमिति शंकिताः संतः कथयामासुरिति ५ सूर्यं नमस्काराय आगतं संकल्पयित्वा डिंभज्ञानां संबोधनानि नारायणेत्या
दीनि ६ गभस्तिचक्रेण रश्मिजालेन मुष्णन् प्रतिघ्नन् मातीदृशगावो रश्मयो यस्य सः नचेदमघटमानमित्याहुः नन्विति अन्विच्छंति मार्गं
प्रति अजः सूर्यः ८ बालानामज्ञानां वचनं ज्वलन् विद्योतमानः ९ कृतानि कौतुकेन उत्सवेन मंगलानि यस्मिन् तत् विप्रैः कृत्वा भारप्रमा

तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः दीव्यते दैर्भगवते शशंसुः सूर्यशंकिताः ५ नारायण नमस्तेस्तु शंखचक्रग
दाधर दामोदरारविंदाक्ष गोविंद यदुनंदन ६ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि
तिग्मगुः ७ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ८ श्रीशुक उवाच निशम्य
बालवचनं प्रहस्यांबुजलोचनः प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ९ सत्राजित् स्वगृहं श्रीमत्कृतकौतुकमंगलं
प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् १० दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयो
शुभाः ११ न संति मायिनस्तत्र यत्रास्तेभ्यर्चितो मणिः स याचितो मणिं क्वापि यदुराजाय शौरिणा १२ नैवार्थकामुकः प्राद
द्याञ्चाभंगमतर्कयत् तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं प्रसेनो हयमारुह्य मृगयां व्यचरद्वने १३

ण चतुर्भिर्व्रीहिभिर्गुंजा गुंजाः पंच पणं पणान् अष्टौ धरणं अष्टौ च कर्षणं तांश्चतुरः पलं तुला पलं शतं प्राहुर्भारः स्याद्विंशति स्तुलाः
तिमारी नाम अकालमृत्युः अरिष्टम् अमंगं अशुभाः दुःखहेतवः कोपि कदाचित् अनेन भगवत्समर्पणेः स्वयमगृहीतो भोजिनः सर्वानिष्टनिवर्त्त
कमपि अनिष्टहेतुरेव भवतीति सूचितं ११ १२ तदेव दर्शयितुमाह तदेकदेति प्रतिमुच्य बध्वा प्रसेन सत्राजिद्भ्राता १३

सहमणिनासमर्पयामास ३२ ३५ श्रीकृष्णप्राप्त्यर्थेचंद्रभागांनामदुर्गामभजन् ३६ सचकृष्णस्तेषांप्रादुर्बभूवप्रासवइतिपाठेप्रासवइंद्रियाणितेषांप्रेष्ठ इत्यर्थः कदादेव्याउपस्थानात्तत्पातान्प्रतिज्ञादिष्टस्तया आशीः कृष्णंदृष्टस्येतितयासहैवयदिलोकेजनाः कथंचिन्मृतंबंधुंपुनरागतमुपलभंतेतद्वदुपलभ्यसर्वेजातमहोत्सवा आसन्निति ३८ ३९ पाप्मना अपराधेनानुतप्यमानः ४० अयंदोषंआत्मनोरजःमलं

2)

इत्युक्तःस्वांदुहितरंकन्यांजांबवतींमुदा अर्हणार्थंसमणिनाकृष्णायोपजहारह ३२ अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः प्रतीक्ष्यद्वादशाहानिदुःखिताःस्वपुरंययुः ३४ निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः सुहृदोज्ञातयोशोचन् बिलात्कृष्णमनिर्गतं ३५ सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये ३६ तेषांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषासह प्रादुर्बभूवसिद्धार्थःसदारोहर्षयन्हरिः ३७ उपलभ्यहृषीकेशंमृतंपुनरिहागतं सहपत्न्यामणिग्रीवंसर्वेजातमहोत्सवाः ३८ सत्राजितंसमाहूयसभायांराजसन्निधौ प्राप्तिंचाख्यायभगवान्मणिंतस्मैन्यवेदयत् ३९ सचातिव्रीडितोरत्नंगृहीत्वावाङ्मुखस्ततः अनुतप्यमानोभवनमगमत्स्वेनपाप्मना ४० सोनुध्यायंस्तदेवाघंबलवद्विग्रहाकुलः कथंमृजाम्यात्मरजः प्रसीदेद्वाच्युतः कथं ४१ किंकृत्वासाधुमह्यंस्यान्नशपेद्वाजनोयथा अदीर्घदर्शनंक्षुद्रंमूढंद्रविणलोलुपं ४२ दास्येदुहितरंतस्मैस्त्रीरत्नंरत्नमेवच उपायोयंसमीचीनस्तस्यशांतिर्नचान्यथा ४३

अपराधमिति ४१ किंकृत्वाकस्मिन्कृतइत्यर्थः साधुभद्रं अदीर्घदर्शनंअविचारकंमांक्षुद्रंकृपणंमूढंमंदमतिं ४२ एवंध्यायन्उपायंनिश्चिनोतिदास्यइतिस्त्रीरत्नंदुहितरंतावद्दास्यामितदनंतरंपारिबर्हत्वेनरत्नमपीति ४३

न लोके कोवायं मत्तो बलीयानिति विस्मितः सन्निमं प्याह जाने इति सर्वभूतानां यः प्राणः तत्र यदोजः सहो बलं चेंद्रियहृदयदेहबलानि तत्सर्वं त्वमित्यहं जाने कथं तथात्वमत आह विष्णुमित्यादि २७ पुराणत्वे हेतुस्त्वं हीति स्रष्टा निमित्तं यच्च सत् उपादानं अतः पुराणः प्रभविष्णुत्वे हेतुः काल इति अधीश्वरत्वमप्यत एवेत्याह ईश इति परश्चेत्याह आत्मनामिति २८ यत एवंभूतः अत ममेष्टदेवं रघुनाथ एव त्वमित्याह यस्येति ईषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहाः तिमिं

जाने त्वां सर्वभूतानां प्राणओजः सहो बलं विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरं २७ त्वं हि विश्वसृजां स्रष्टा सृष्टानामपि यच्च सत् कालः कलयतामीशः पर आत्मा तथात्मनां २८ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः सेतुः कृतः स्वयश उज्वलिता च लंका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि २९ इति विज्ञातविज्ञानमृक्षराजानमच्युतः व्याजहार महाराज भगवान् देवकीसुतः ३० अभिमृश्यारविंदाक्षः पाणिना शंकरेण तं कृपया परया भक्तं मेघगंभीरया गिरा ३१ मणिहेतोरिह प्राप्ता वयमृक्षपते बिलं मिथ्याभिशापं प्रमृजन्नात्मनो मणिनामुना ३२

गिला महामत्स्याश्च यस्मिन् सोऽब्धिर्वर्त्मादिशाद्दत्तवान् तथापि येन तस्मिन् च यश एव सेतुः कृतः उज्वलिता च दग्धा च यस्येषुभिः दीतनि छिन्नानि रक्षसो दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने २९ इति विज्ञातविज्ञानं येन तं विज्ञानशब्दः करणसाधनः कर्मसाधनो वा ऋक्षराजं प्रति उक्तवान् ३० ३१ वयं त्विह बहवो बिलद्वारं प्राप्ताः तत्र मिथ्याभिशापममुना मणिना प्रमृजन् प्रमार्ष्टुमहं एवांतर्बिलमिह प्राप्त इत्यर्थः ३२

जग्मिवान्जगाम ६ ११ हेलनंप्रतिकूलं वृजिनमपराधं १२ अपीतोमृतः सप्तदशसंख्याकान्संयुगान् १३ १४ तौरामकृष्णावेकमेवतत्त्वमि

एवंभिन्नमतिस्ताभ्यांसत्राजितमसत्तमः शयानमवधील्लोभात्सपापःक्षीणजीवितः ५ स्त्रीणांविक्रोशमानानांक्रंदंतीनाम
नाथवत् हत्वापशून्सौनिकवन्मणिमादायजग्मिवान् ६ सत्यभामाचपितरंहतंवीक्ष्यशुचार्पिता व्यलपत्तातताते
तिहाहतास्मीतिमुह्यती ७ तैलद्रोण्यांमृतंप्रास्यजगामगजसाह्वयं कृष्णायविदितार्थायतप्ताचख्यौपितुर्वधं ८ तदा
कर्ण्येश्वरौराजन्ननुसृत्यनृलोकतां अहोनःपरमंकष्टमित्यस्राक्षौविलेपतुः ९ आगत्यभगवांस्तस्मात्सभार्यःसाग्रजः
पुरं शतधन्वानमारेभेहंतुंहर्तुंमणिंततः १० सोपिकृतोद्यमंज्ञात्वाभीतःप्राणपरीप्सया साहाय्येकृतवर्माणमयाचतसचाब्र
वीत् ११ नाहमीश्वरयोःकुर्य्यांहेलनंरामकृष्णयोः कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् १२ कंसःसहानुगोपीतोयद्द्वेषा
त्त्याजितःश्रिया जरासंधःसप्तदशसंयुगाद्विरथोगतः १३ प्रत्याख्यातस्सचाक्रूरंपार्ष्णिग्राहमयाचत सोप्याहकोविरुध्येतविद्वा
नीश्वरयोर्बलं १४ यइदंलीलयाविश्वंसृजत्यवतिहंतिच चेष्टांविश्वसृजोयस्यनविदुर्मोहिताजया १५ यःसप्तहायनःशैलमुत्पा
ट्यैकेनपाणिना दधारलीलयाबालउच्छिलींध्रमिवार्भकः १६ नमस्तस्मैभगवतेकृष्णायाद्भुतकर्मणे अनंतायादिभूतायकूटस्था
यात्मनेनमः ७ प्रत्याख्यातःसतेनापिशतधन्वामहामणिं तस्मिन्न्यस्याश्वमारुह्यशतयोजनगंययौ १८ गरुडध्वजमारु
ह्यरथंरामजनार्द्दनौ अन्वीयतांमहावेगैरश्वैराजन्गुरुद्रुहं १९

त्यभिप्रेत्याहयइदमिति अजयामाययामोहिताजयेतिसंधिरार्षः १५ १६ १७ अंतर्यामिकृष्णनियुक्तस्मिन्नक्रूरेमणिंन्यस्यययौपा
लयतः १८ गुरुःश्वसुरस्तद्धंतारं १९

बहुभिः कृतवर्मादिभिः ४५ मणिंनप्रतीच्छामः नस्वीकुर्मः देवस्यमन्तकस्येतिकटाक्षः फलभागिनइतिवृष्णिपुत्रत्वात्त्वदीयंधनमस्माकमे
वेतिगूढोभिप्रायः ४६ इतिदशमेषट्पंचाशत्तमोऽध्यायः ५६ सप्तपंचाशत्तमेतुपुनःशतधनुर्वधे प्राप्तंस्वद्वयंमणेर्माहेश्वरिकृष्णोक्रूर हतान्मणेः १
अक्रूरमुररीकृत्यमणेःपात्रमथाच्युतः उपामंत्र्यतमेकांतेसग्रामेभ्रातृकंच यं २ सत्राजितः कृष्णाज्ञाभंगफलंव्यक्तीकर्तुमाह विज्ञातार्थोपीति

एवंव्यवसितोबुद्ध्यासत्राजित्स्वसुतांशुभां मणिंचस्वयमुद्यम्यकृष्णायोपजहारह ४४ तांसत्यभामांभगवानुपयेमे
यथाविधि बहुभिर्याचितांशीलरूपौदार्यगुणान्वितां ४५ भगवानाहनमणिंप्रतीच्छामोवयंनृप तवास्तांदेवभक्तस्य
वयंचफलभागिनः ४६ यइदंशृणुयाद्राजन्भक्तियोगेनमानवः तस्यापवादंसुमहद्बाधतेनकदाचन ४७ इतिश्री
भागवतेमहापुराणेदशमस्कंधेस्यमंतकाहरणंनामषट्पंचाशत्तमोऽध्यायः ५६ श्रीशुकउवाच विज्ञातार्थोपिगोविंदोद
ग्धानाकर्ण्यपांडवान् कुंतींचकुल्यकरणेसहरामोययौकुरून् १ भीष्मंकृपंसविदुरंगांधारींद्रोणमेवच तुल्यदुःखौसमाग
म्यहाकष्टमितिहोचतुः २ लब्ध्वैतदंतरंराजन्शतधन्वानमूचतुः अक्रूरकृतवर्माणौमणिःकस्मान्नगृह्यते ३ योऽस्म
भ्यंसंप्रतिश्रुत्यकन्यारत्नंविगर्ह्यनः कृष्णायादान्नसत्राजित्कस्माद्भ्रातरमन्वियात् ४

पांडवाबिलद्वारेणजतुगृहान्निर्गताइत्येवंविज्ञातोर्थोयेनसः कुंतींचदग्धामाकर्ण्यकुल्यंचरणेकुलोचितसंव्यवहारार्थं १ अत्येषांतद्दुःखा
भावात्भीष्मादीन्संगम्यतेतुल्यदुःखौ २ ३ ननुजीवन्सत्राजितकथंमणिंदास्यतितत्राहतुः योऽस्मभ्यमिति भ्रातरंप्रसेनंमृतंकस्मान्नान्वियात्नानुगच्छे
तन्म्रियतामित्यर्थः ४

भा०१०उ० व्यूषतुः द्वारकायाः सकाशात् क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्तकौ तत्राक्रूरः कृष्णानुमत्यैव गतः कृतवर्मा तु
२३ भक्तपक्षपात आक्षेपभयादिवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वरवचनं तयोः संभवतीति २९ तदेवं श्रीबादरायणिस्त्वादानय
तिसमाख्यया मणिहस्तेऽक्रूरे सकलवेदैकमहाधुरेयजमाने निवसति सति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इतिवक्ष्यति

२३ अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधं व्यूषतुर्भयसंत्रस्तौ द्वारकाया प्रयोजकौ २९ अक्रूरे प्रोषितेऽ
रिष्टान्यासन्वै द्वारकौकसां शारीरमानसास्तापा मुहुर्दैविकभौतिकाः ३० इत्यंगोपदिशंत्येके विस्मृत्य
प्रागुदाहृतं मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ३१

जपति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्राहकयाक्रूरमाहूय साक्षेपं श्रीकृष्णः प्राह इयं च भगवन्महत्त्वं संगोप्य
केचन कृष्णयोन्यकारणमक्रूरानयने वर्णयंति तद्यथा स्फुटं दूषयितुमनुवादंति अक्रूरे प्रोषित इति ३० दूषयति इती
ति अंग हे भारत श्रीकृष्णमहात्म्यं विस्मृत्येति तदेवाह मुनिवास इति मुनीनां वासो यस्मिन् स मुनिवासः श्रीकृष्णस्तस्य निवा राम:
सेसति अक्रूरापगमनमात्रेणारिष्टदर्शनं किं घटेत तदरिष्टं विना न घटतेत्यर्थः ३१ २३

शतयोजनमात्रगामित्वात्ततः परं गंतुमशक्तस्तत्र पतितस्तं हयं विसृज्य २० अचिनोत् अमृगयामास २१ अक्रूरे मणिरस्तीति सर्व
ज्ञतया विदित्वापि शमवंचनाय तथाकृतवानिति भावः २२ अन्वेष्य अन्विष्य २३ सर्वज्ञस्यैवं चेष्टितं मुग्धवंचनायेति मत्वा गूढम

मिथिलाया उपवने विसृज्य पतितं हयं पद्भ्यामधावत्संत्रस्तः कृष्णोऽप्यन्वद्रवद्रुषा २० पदातेर्भगवांस्तस्य
पदातिस्तिग्मनेमिना चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं २१ अलब्धमणिरागत्य कृष्णमाहाग्र
जोंऽतिकं वृथा हतः शतधनुर्मणिस्तत्र न विद्यते २२ तत आह बलो नूनं स मणिः शतधन्वना कस्मिंश्चित्पुरु
षे न्यस्तस्तमन्वेष पुरं व्रज २३ अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम इत्युक्त्वा मिथिलां राजन्विवेश यदुनं
दनः २४ तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः अर्हयामास विधिवदर्हणीयं समर्हणैः २५ उवास
तस्यां कतिचिन्मिथिलायां समा विभुः ततोऽशिक्षद्गदां काले धार्त्तराष्ट्रः सुयोधनः २६ मानितः प्रीतियुक्तेन
जनकेन महात्मना केशवो द्वारकामेत्य निधनं शतधन्वनः २७ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्वि
भुः ततः स कारयामास क्रिया बंधोर्हतस्य वै साकं सुहृद्भिर्भगवान्या याः स्युः सांपरायिकाः २८

न्मूराह अहमिति २४।२५ कतिचित्समाः संवत्सरान् प्रासंगिकमाह तत इति २६ सत्यभामामप्येवं वंचयदिति सूचयन्नाह केशव इति

२७ बंधोः सत्राजितः सांपरायिकाः परलौकिकाः २८

अविच्छिन्नाः संततामखावर्त्तत इति ३९ अलब्धा उक्ताः हरि स्पृष्ट इति वा ४० रजः मिथ्याभिशापं संमृज्य अन्यैर्दुरं इत्यादि मिषेण श्रीलाभयस्तस्मै प्रसर्पितवानिति ४१ दुःकीर्त्तिं मलं दुरितं चेति ४२ इति दशमे शप्तपंचासत्तमे ५८ अथ पंचाशत्तमे तु कृष्णः पंच करेण्ग्रहीत् कालिंदीमित्रविंदां च सत्यां भद्रां च लक्ष्मणां कालिंदी निजलाभाय तपः परमुपेयुषी परिणेष्यन् प्रियावासमिंद्रप्रस्थमथागमत् २ इतीलान्न लुप्तानपि दुपदस्य हे पुनसर्वे दृष्टान् युयुधानः सात्यकिः १ प्राणा इंद्रियाणि मुख्यं पंचव

अव्युच्छिन्नामखास्ते यवर्त्तते रुक्मवेदयः ३९ एवं सामभिरालब्धःस्वफल्कतनयो मणिं आदाय वाससाछन्नं ददौ सूर्यसमप्रभं ४० स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ४१ यस्त्वेतत् भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्त्तिं दुरितमपोह्य याति शांतिं ४२ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने शप्तपंचाशत्तमोध्यायः ५७

श्रीशुक उ० एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः १ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरं उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं २ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ३ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं अर्जुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ४ परमासन आसीनं कृष्णा कृष्णमनिंदिता नवोढा व्रीडिता किंचित् शनैरेत्याभ्यवंदत ५ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः निषसादासनेन्ये च पूजिताः पर्युपासत ६

त्रिप्राणमिव २ ३ ज्येष्ठयोः प्रणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यां अभिवंदितो बभूव कृष्णा द्रौपदी बहुभार्यो सत्यपि निंदारहितार्थे नवं अचिरं ऊढा परिणीता ६

पुनस्तन्मतमेवानुवर्णयति काशीशः शेषु देवे मघवत्स्ववर्षतीति सप्तति ॥ ३२ ॥ ३३ ॥ इत्येवंभूतमक्रूरमहिमाप्रतिपादनपरं वृद्धानां वाक्यं
श्रुत्वा सत्यमेव तथाप्येतावदेव कारणं न भवति किंतु मणेरपरमं इति मत्वेत्येतदंतं परमतं ३४ वस्तुतस्तु ब्रह्मलीलावसा
देवादिष्टादिदर्शनमिति शुकादिसंमतमिति भावः विज्ञातमखिलं येन स चासौ अत एव चित्तज्ञश्चेत्यर्थं भावः महाभागवत

देवेऽवर्षति काशीशः श्वफल्कायागताय वै ॥ स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत्स्म काशिषु ॥ ३२ ॥ तत्सुतस्तत्प्रभावो
सावक्रूरो यत्र यत्र ह देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ ३३ ॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणं ॥ इति
मत्वा समानीय प्राहाक्रूरं जनार्दनः ॥ ३४ ॥ पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिल
चित्तज्ञः स्मयमान उवाच ह ॥ ३५ ॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥ स्यमंतको मणिः श्रीमान्विदितः
पूर्वमेव नः ॥ ३६ ॥ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः ॥ दायं निनीयापः पिंडान्विमुच्यर्णं च शेषितं ॥ ३७ ॥
तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रत मणिः ॥ किंतु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति दर्शयस्व महाभाग

स्वास्थ्यमयास्त्वेपि मरणानपेक्षा नास्त्येव यस्माद्बहुतो मणिना सहैवागत इति ३५ ३६ ततः किमत आह सत्राजित इति अपः पिंडां
आनिनीय दत्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुरिति शास्त्रं तथा च स्मरंति
पत्नी दुहितरश्चैव पितरो भ्रातरस्तथा तत्सुता गोत्रजा बंधुशिष्याः सब्रह्मचारिणः इति अग्रजोऽपि न प्रत्येति न विश्वसिति ३८
नास्तीति वचनं वक्तव्यम् ३९

भा०द०उ० बीभत्सुरर्जुनः १६। १७ सख्याश्रीकृष्णेन १८ १९ २० अयं मां कामयेदिति शंकायामाह नान्यमिति २१ २२ आत्सवेवताविश्वा
२५ न् २३ प्रसंगात्तत्कालीनं चरित्रांतरमाह यदैवेति पार्थैर्यदैवसंदिष्टो विश्वकर्मा श्रीकृष्णस्तदैव तेषां विश्वकर्मणा देवशिल्पि
नानगरं कारयामास २४ किंच भगवान्निरतिशयैश्वर्यो गुणवान् अर्जुनस्य धनुरादि लाभाय सारथिरासखांडवं नामैंद्रस्य वनं

तद्दपरी श्रांतो बीभत्सुर्यमुनामगात् तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ १६ कृष्णो ददृशतुः कन्यां चरं
तीं चारुदर्शनां १७ तामासाद्य वरारोहां सुद्विजां रुचिराननां पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां १८
का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि मन्ये त्वां पतिमिच्छंतीं सर्वं कथय शोभने १९ कालिंद्युवाच
अहं देवस्य सवितुर्दुहिता पतिमिच्छती विष्णुं वरेण्यं वरदं तपः परममास्थिता २० नान्यं पतिं वृणे
वीर तमृते श्रीनिकेतनं तुष्यतां मे स भगवान् मुकुंदोऽनाथसंश्रयः २१ कालिंदीति समाख्याता वसा
मि यमुनाजले निर्मिते भवने पित्रा यावदच्युतदर्शनं २२ तथावदद्गुडाकेशो वासुदेवाय सोऽपि तां रथमारोप्य तद्वि
द्वान् धर्मराजमुपागमत् २३ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतं कारयामास नगरं विचित्रं विश्वकर्मणा २४
भगवांस्तत्र निवसन् स्वानां प्रियचिकीर्षया अग्नये खांडवं दातुमर्जुनस्यास सारथिः २५ सोऽग्निस्तुष्टो धनुरदाद्
यान् श्वेतान् रथं नृप अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः २६ मयश्च मोचितो वन्हेः सभां सख्य उपाहरत्
यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः २७ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः आययौ द्वारकां भू
य सात्यकिप्रमुखैर्वृतः २८

खांडवदाहकवन्हेः सखा अर्जुनाय यस्मिति सामान्यतो निर्देशः यस्यामित्यर्थः जलस्थलयोर्दर्शने दृष्टे भ्रमः पदाजलं तस्य तत्र
दृक् दृष्टिर्यस्मिन् तज्जलस्थलदृक् तस्मिन् भ्रमः आसीदिति २८

अतिहार्दनस्नेहेन आर्द्रे सजले दृशौ यस्यास्तया परिपृष्टा बांधवा यस्य सः ७ प्रेम्णा वैक्लव्यं तेन रुद्धकंठो यस्याः क्लेशापाये आत्मनि
दर्शनं यस्य तं भजतां भक्तानां क्लेशापायेय आत्मानं आत्मानं दर्शयतीति वा ८ ज्ञातीन्नः इत्यर्धं अन्वयो नोस्मान्यद्यस्माद्भ्राता अक्रूरः प्रेषितः ९

पृथ्वी समागम्य कृताभिवादिनः तयातिहार्दार्द्रदृशाभिरंभितः आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्ट
बांधवः ७ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनं ८ तदैव कुशलं
नो भूत्सनाथास्ते कृता वयं ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ९ न तेस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः
तथापि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः १० युधिष्ठिर उवाच किं न आचरितं श्रेयो न वेदाहमधीश्वर यो
गेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसां ११ इति वै वार्षिकान्मासान् राज्ञा सोभ्यर्थितः सुखं जनयन्नयनानंदमिंद्रप्र
स्थौकसां विभुः १२ एकदा रथमारुह्य विजयो वानरध्वजं गांडीवं धनुरादाय तूणौ चाक्षयसायकौ १३ साकं कृ
ष्णेन सन्नद्धो विहर्तुं विपिनं वनं बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा १४ तत्राविध्यच्छरैर्व्याघ्रान्शूकरान्म
हिषान्रुरून् शरभान्गवयान्खड्गान् हरिणान्शशसल्लकान् १५ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्युपागते

ज्ञातीन्नितिवचनात् आप्तमोहं वारयति स्वोतिनतेस्तीति तत्र हेतुः विश्वस्येति सुहृच्च आत्मा च तस्य हंसि नाशयसि १० कुमे
धसां विषयासक्तचित्तानां दृष्टोसि ११ अ सुखं अवसदिति शेषः सुखमभ्यर्थित इति वा क्रियासमाप्तिः १२ अथ कालिंदीदर्श
नप्रसंगमाह अक्षयाः सायका ययोस्तौ तूणौ इषुधी १३।१५ राज्ञे युधिष्ठिराय मेध्यान्कर्मोहान् १६ ss ss

भा० द० उ०
२६

हे नरेंद्र राजन्यबंधोः निन्दितस्य युक्तः न इत्यादिग्रहः ४१ ४२ गुणानामेकमेव धाम स्थानं त्वं तथाभूतस्य यस्य तवांगे ४३ दुर्दांताः

२६

श्रीभगवानुवाच नरेंद्र याञ्चा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः तथापि याचे तव सौहृदेच्छया कन्यां त्वदी
यां नहि शुल्कदा वयं ४० राजोवाच कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी
४१ किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ४२ सप्तैते गोवृषा वीर दुर्दां
ता दुरवग्रहाः एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ४३ यदिमे निगृहीताः स्युस्त्वयैव यदुनंदन वरो भवान
भिमतो दुहितुर्मे श्रियःपते ४४ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लील
यैव तान् ४५ बद्ध्वा तान्दामभिः शौरिर्भग्नदर्पान्हतौजसः व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ४६ ततः
प प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ४७ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा
प्रियं पतिं लेभिरे परमानंदं जातश्च परमोत्सवः ४८ शंखभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः नरा नार्यः प्रमु
दिताः सुवासःस्रग्गलंकृताः ४९ दशधेनुसहस्राणि पारिबर्हमदात्प्रभुः युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससां

अपि शिक्षिताः दुरवग्रहाः अपरायत्ताः कुतस्तत्राह एतैरिति भग्नाः भंगं प्राप्ताः एतान्यो निगृह्णाति तस्य कन्येति समयः कृतः ४० रामः
यत्र यदि इमे गोवृषाः सप्तधा कृत्वेति बह्वीनां योषितां संप्राप्ते एवाहं संभोगयोग्यः स्यामिति सत्यं समं सापत्न्यप्रदर्शनार्थमात्मनः २६
सप्तधाकरणं ४५ निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां च दासीनां ५०

सुपुत्रपक्ष्मलुः रक्षंचयस्मिन् २९ पंचमं मित्रविंदा विवाहमाह विंदानुविंदावितिद्वाभ्यां आवंत्यौ अवंतीराजानौ ३० ३१ अथ
माह नग्नजिदिति कौशल्यः अयोध्यापतिः सत्यानामकन्या अभवत् देवी कांतिमती नाग्निजिती पितृनाम्ना प्रसिद्धेत्यर्थः वीरस्य गंध

अथोपयेमे कालिंदीं सुपुण्यर्त्वृक्ष ऊर्जिते वितन्वन् परमानंदं स्वानां परममंगलः २९ विंदानुविंदावावंत्यौ दुर्योध
नवशानुगौ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधतां ३० राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः प्रसह्य ह
तवान् कृष्णो राजन् राज्ञां प्रपश्यतां ३१ नग्नजिन्नाम कौशल्य आसीद्राजातिधार्मिकः तस्य सत्याभवत्कन्या दे
वी नाग्निजिती नृप ३२ न तां शेकुर्नृपा वोढुमजित्वा सप्तगोवृषान् तीक्ष्णशृंगान् सुदुर्मर्षान् वीर्यगंधासहान्
खलान् ३३ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः जगाम कौशल्यपुरं सैन्येन महता वृतः ३४ स कौ
शल्यपतिः प्रीतः प्रत्युत्थानासनादिभिः अर्हणेनापि गुरुणा पूजयन् प्रतिनंदितः वरं विलोक्याभिमतं स
मागतं नरेंद्रकन्या चकमे रमापतिं भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे धृतो व्रतैः ३६ अर्चि
तं पुनरित्याह नारायण जगत्पते आत्मानंदेन पूर्णस्य करवाणि किमल्पकः ३७ यत्पाद पंकजरजः शिर
सा बिभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः लीलातनुः स्वकृतसेतुपरीप्सया यः कालेदधत्स भगवान्मम
मकेन तुष्येत् ३८ श्रीशुक उवाच तमाह भगवान् हृष्टः कृतासनपरिग्रहः मेघगंभीरया वाचा सस्मितं कुरुनंदन

धमपि न सहत इति तथा तान् खलान् दुर्वृत्तान् ३३ वृषान् जयति सः वृषजित्तेन लभ्यां ३४ प्रतिनंदितः तं प्रतिनंदितवान् श्रीकृष्णो वासः
प्रतिनंदितः ३५ ३६

भा०द०उ० ऊनषष्टितमे भौमं हत्वा तेनाहृता हरिः कन्यासहस्रसः प्राप्य पारिजातं दिवोहरत् परिणीयत तास्ताभिस्तन्मनोरथपूरणे आत्मारा
२७ मोप्यसौ रेमे नरदेहेषु गृहस्थवत् येन ताः स्त्रियो निरुद्धाः स भौमः चकार यथा येन कारणेन हतस्तत् आचक्ष्वेति १ इंद्रेण भौम
विचेष्टितं विज्ञापितः सन् प्राग्ज्योतिषपुरं भौमनगरं ययाविति अन्वयः कथंभूतेन हृतं छत्रं यस्य तेन लोकपालप्रधानत्वाद्दि
स्य वरुणच्छत्रहरणेपि तस्यैव मानभंग इति तथोक्तं हृते कुंडले यस्याः सादितिः बंधुः ज्ञातायस्य तेन हृतममराद्रेः स्थानं मणि

27 राजोवाच यथा हतो भगवता भौमो येन च ताः स्त्रियः निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः १ श्रीशुक उवाच
इंद्रेण हृतछत्रेण हृतकुंडलबंधुना हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं २ सभार्यो गरुडारूढः प्रा
ग्ज्योतिषपुरं ययौ गिरिदुर्गैः शस्त्रदुर्गैः जलाग्न्यनिलदुर्गमं ३ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं गदया
निर्बिभेदाद्रीन् शस्त्रदुर्गाणि सायकैः चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना शंखनादेन यंत्राणि हृ
दयानि मनस्विनां ५ प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः पांचजन्यध्वनिं श्रुत्वा युगांतासनिभीषणं
मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् ६

पर्वतलक्षणं यस्य तेन सत्यभामाया गृहे भगवंतमिंद्र आगम्य विज्ञापितवान् तदा तस्याः कौतुकापत्तया भार्यया सह ययाविति
यद्वा लेखनुपायेव त्वत्पुरं हनिष्यामीति इतिहासोक्तं भूम्यै वरं दत्तं सत्यं कर्त्तुं सत्यभामाया भूम्यंशत्वात् तया सह ययौ यद्वा ना
रदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सांत्वयित्वा तुभ्यं पारिजातमेव दास्यामीति प्रति
श्रुत्वैनं प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं तां नीतवानिति ज्ञेयं २ गरुडेन याने कारणं गिरिदुर्गैरित्यादिभि राम
रुपलक्षितं जलाग्न्यानिलैश्च सर्वतो वर्त्तमानैर्दुर्गमं ३ ४ ५ युगांतोशनेर्ध्वनिवद्भीषणं परिखाया जलात् ६ २७

नागाल्नागेभ्यः शतगुणान्नवलक्षाणि रथाल् रथेभ्यः शतगुणान्नवकोटीः अश्वात् अश्वेभ्यः शतगुणान्नवपद्मानि ५१ यदु
भिर्गोवृषैरभग्नवीर्या अपि सुदुर्मर्षाः रुरुधुः ५३ अस्यतः द्विषतः कुंभानानिति यावत् ५४ शत्रुमं विवाह माह श्रुतकीर्त्ति

ञ तं२

नवनागसहस्राणि नागाद्दशगुणान्रथान् रथाच्छतगुणानश्वान् अश्वाच्छतगुणान्नरान् ५२ दंपतीरथमा
रोप्य महत्या सेनया वृतो स्नेहप्रक्लिन्नहृदयो प्रेषयामास कोशलः ५३ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां भ
ग्नवीर्या सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ५४ तानस्यतः शरव्रातान्बंधुप्रियकृदर्जुनः गांडीवी कालयामास
सिंहः क्षुद्रमृगानिव ५५ पारिवर्हमुपागृह्य द्वारकामेत्य सत्यया रेमे यदूनामृषभो भगवान्देवकीसुतः ५६
श्रुतकीर्तेः सुतां भद्रां उपयेमे पितृष्वसुः कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ५७ सुतां च मद्राधिपते
र्लक्ष्मणां लक्षणैर्युतां स्वयंवरे जहारैकः स सुपर्णः सुधामिव ५८ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सह
स्रशः भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ५९ इति श्रीभागवते महापुराणे दशमस्कंधे माहिष्योद्वा
होनामाष्टपंचाशत्तमोऽध्यायः ५८

रिति श्रुतकीर्त्तिर्नाम या पितृष्वसा तस्याः तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजां ५६ अथ मद्रमाह सुतां चेति एक एवाश्रीहृ
षो लक्ष्मणां जहार ५७ ५८ तस्य निरोधोऽतः तत्पुरस्तस्मात् भैष्मी जांबवती भामा सत्या भद्रा लक्ष्मणा कालिंदी मित्रविंदा चे
ताष्टपट्टमहास्त्रियः ५९ इति दशमे भागवते नामाष्टपंचाशत्तमोऽध्यायः ५८

 अस्याख्यये कुरु इहेति संबोधनं तथा हतेषु तेषु निमुक्तानि शस्त्राणि तत् शोभिः पूर्वमेव तान् सैन्यं सर्वं हत्वा पश्चात् तानि शस्त्राणि चि
 च्छेद तत्राप्येकैकं सत्वाम स्वचमौभिस्त्रिभिः शरैरित्यन्वयः १७ किंच गरुत्मतेति ८ यतः यया शतकोटिर्वज्रः प्रतिहतः आसी

यानियोधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः १७ उह्यमानः सुपर्णेन
पक्षाभ्यां निघ्नता गजान् गरुत्मता हन्यमाना स्तुंडपक्षनखैर्गजाः १८ पुरमेवाविशन्नार्त्ता नरको युध्ययुध्यत १
९ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः २० नाकंपत तया विद्धो माला
हत इव द्विपः शूलं भौमोऽच्युतं हंतुमाददे वितथोद्यमः २१ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः अपाहरद्गजस्थ
स्य चक्रेण क्षुरनेमिना २२ सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलन् हाहेति साध्वित्यृषयः
सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे २३ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे सवैजयंत्या व
नमालयार्पयत् प्राचेतसं छत्रमथो महामणिं २४ अस्तौषीदथ विश्वेशं देवी देववरार्चितं प्रांजलिः प्रणता रा
जन्भक्तिप्रवणया धिया २५

१९ असौ गरुड स्तं नाकंपत गरुडेवितथोद्यमः सन् २० २३ प्रतप्तजांबूनदस्यानि रत्नानि तैर्भास्वरे मे र्वं शम्भूतं मंदिराधीश्वरं महामणिं

आविध्य भ्रान्त्वा ल्पस मत्वा नूनादद्वन्द्वयः तस्मै श्री कालाय गदां प्रमुंचत् ७ ईड्डनेजसावक्त्रेण ९ प्रतिक्रियया हेतुभूतया क्रमवेज्
जः ११ पौगं पौगण्डमाले निरगान् निरागमन् १३ निकृत्तानि शीर्षाणि येषां तान् १३ प्रत्तप्रां शक्तिविशेषा १४ १७ विचित्रा वाजा

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगान्तसूर्यानलरोचिरुल्बणः ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथो
रगः ८ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः स रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाह
मावृणोत् ९ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधोजसा मुखेषु तं चापि शरैरताडयत्तस्मै गदां सो
पि रुषा व्यमुंचत १० तामापतंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा उद्यम्य बाहूनभिधावतोजितः शिरां
सि चक्रेण जहार लीलया व्यसुः पपाताम्भसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेन्द्रतेजसा ११ तस्यात्मजाः सप्त पितु
र्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः ताम्रोन्तरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः १२ पीठं पुर
स्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन् धृतायुधाः १३ प्रायुंजतासाद्य शरानसीन्गदाः शक्त्यृष्टिशूलान्यजिते रुषो
ल्बणाः तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह १४ तान्पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षांघ्रि
भुजोरुवर्मणः स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः १५ निरीक्ष्य दुर्मर्षण आस्रव।
न्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा १६ कृष्णं।
स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शि
लीमुखैः निकृत्तबाहूरुशिरोध्रविग्रहं चकार तर्ह्येव हताश्वकुंजरं १७

पत्राणि येषां ते वाणैर्निकृता बाहवः उरवः शिरोधयः कंधरा विग्रहाश्च देहाः यस्य तत्तत्तर्ह्येव तस्मिन्नेव क्षणे
१८

भा०द०उ० मनुरगुण विश्वोत्पत्यादिहेतवः तेच प्रधानस्यैव तस्य च पुरुषः सोऽभक्तः तत्र च कालो निमित्तमिति प्रसिद्धं किमत्राह तत्राह त्वं वा इति ल
२७ मसो धारणे पुनसंवृत एव स्थानाय पालनाय जगतः सत्त्वार्थं तत्कारणं आदित्रमेव बिभर्षि सत्तसोऽर्थः कालप्रधानपुरुषास्त्वत्व्य
तिरिक्ता न संति त्वं तु परः सर्वव्यतिरिक्तः अत स्त्वमेत्वजनोऽयमित्यर्थः २८ कार्यकारणप्रपंचस्य तद्व्यतिरिक्तं तस्य च सर्वव्यतिरक
मुपपादयति अहमिति अहं भूमिः मात्राणि इति देवा मनः इंद्रियाणि तच्चत्रिविधाहंकारकार्याणि कर्ताहंकारं ३० एवं स्तुत्वा

त्वं वै सिसृक्षू रज उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो भवान्परः
२९ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि कर्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं
भ्रमः ३० तस्यात्मजोऽयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिल
कल्मषापहं ३१ श्रीशुक उवाच इति भूम्यार्थितो वाग्भिर्भगवान्भक्तिनम्रया दत्त्वाभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ३२
तत्र राजन्यकन्यानां षट्सहस्राधिकायुतं भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ३३ तं प्रविष्टं स्त्रियो वीक्ष्य नरवर्यं वि
मोहिताः मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितं ३४ भूयात्पतिरयं मह्यं धाता तदनुमोदतां इति सर्वाः पृथक्कृष्णे भावे
न हृदयं दधुः ३५ शे २

येयं तत्रस्थितिः हे प्रपन्नार्तिहर तस्य नरकस्य अयं भगदत्तो नाम पुत्रो भीतः अत एव भयात्तव पादपंकजमुपसादितः ३१ अभयं दत्त्वा शता टीप
धिका मित्यपि ज्ञातव्यं यथाह श्रीपराशरः कन्यापुरे स कन्यानां षोडशातुल विक्रमः शताधिकानि ददृशे सहस्राणि महामते इति राज २५
भ्यः इत्युपलक्षणं सिद्धादिभ्यश्चेति तथाहि तेनैवोक्तं देवसिद्धासुरादीनां नृपाणां च जनार्दनः हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे
३३

एवं यं ज्ञात्वा भूमिस्तौति नमस्त इत्यादिना परमात्मन् देवाधीश तमो मिन्न २६ येन मंत्रेण स्तुत्याः प्रसन्नः पूर्वमासीत् तेन मंत्रेण नमस्यति
नमः पंकजनाभाय स्फुरत्स्मै जगत्कारणायेत्यर्थः अत एव सर्वोर्हि मयपंकजमाला विद्यते यस्य तस्मै एवंभूतं ध्यायतां पंक
जवत्स्पन्नेतापापशमनं नेत्रे यस्य तस्मै पंकजवत्सुसंस्थापं कजांकितौ अंघ्री यस्य तस्मै नमः इति २७ किंच भगवते नूरनेश
यंत्रपर्णोय वासुदेवाय सर्वभूताश्रयाय अत एव विभूतये मायापनेन नहि सर्वभूताश्रयत्वपरिच्छिन्नस्य संभवतीति कुतः सर्वाश्रय।
त्वं पुरुषत्वं पुरुषाय सर्वस्मात् पूर्वमेव संतिष्ठ एवमेवाहमासामिति तत्पुरुषस्य पुरुषत्वमिति श्रुते एतदपि कृतः आदि

भूमिरुवाच नमस्ते देवदेवेश शंखचक्रगदाधर भक्तेच्छोपात्तरूपाय परमात्मन्नमोऽस्तु ते २५ नमः पंकजनाभाय।
नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये २६ नमो भगवते तुभ्यं वासुदेवाय विष्णवे पुरुषाया
दिवीजाय पूर्णबोधाय ते नमः २७ अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये परावरात्मन् भूतात्मन् परमात्मन्नमोऽस्तु
ते २८

बीजायेत्यादि जगत्कारणस्यापि कारणाय एवमपि महदादिवज्जन्यमित्याह पूर्णबोधायेति २७ नन्वेवमपि स्वकारणात्पूर्वसत्त्वं न स्यात् अ
त आह अजायेति स्वयमजाय अस्य जगतः जनयित्रे ब्रह्मयत्वापि क्रमेण हेतुद्वयं ब्रह्मणे बृहते अनन्तशक्तये बृहत्त्वादनन्तत्वं मन
न्तशक्तित्वाज्जनयितृत्वमित्यर्थः ननु पितामहादयः पुत्रादीनां जनका लोके चेतनाः सर्वेषां च भूतानां तेषां च स्वकर्मैव कारणं जीवाः किमत्राह।
तत्राह परावरात्मन्नित्यादि पितामहादि आत्मत्वात्त्वमेव जनक इत्यर्थः २८

भा.द.उ.
३०

अनुरागहाससहितमवलोकनं तत्त्वेकेन नवसंगमं चतत्र तत्तल्पं च तस्मिन्नासनं च भेजुः ४४ विश्रमणं संवाहनं केशप्रसारः केशप्रसाध
नं दासोनां शतानि विधृते यासां तया भूता अपि तत्त्वं विभो दासीं विदधुरिति ४५ इति श्रीधरकोनषष्टितमोऽध्यायः ५९ अथ षष्टितमे क
मः पौरहासेन रुक्मिणीं कोपयित्वा ततो प्रेमकलहे ताम सान्त्वयत् १ रामरामे जनानंदमहोदयाविडवनैः कुकिमुण्यः प्रेमकलहं ते।
अनेन ध्यप्रमीयते २ स्वतल्पस्थं तल्पपर्यंकस्थं ३ वक्ष्यमाणस्तावभत्यां श्रेयः श्रीकृष्णोपरमं प्रमसंपवाययितुं तस्यात्ममेवतत्त्वमनुस्मारय

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयां भेजुर्मुदाविरतमेधितयानुरागहासावलोकन
नवसंगमजल्पलज्जाः ४४ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः केशप्रसारशयनस्नप
नोपहार्यैर्दासीशता अपि विभो विदधुः स्म दास्यं ४५ इति श्रीभागवते महापुराणे दशमस्कंधे पारिजातहरणेनरका
दिवधैकोनषष्टितमोऽध्यायः ५९ श्रीबादरायणिरुवाच कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुं पतिं पर्यचरद्भै
ष्मी व्यजनेन सखीजनैः १ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः २ तस्मि
न्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना विराजिते वितानेन दीपैर्मणिमयैरपि ३ मल्लिकादामभिः पुष्पैर्द्विरेफकुलना
दितैः जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ४ पारिजातवनामोदवायुनोद्यानशालिना धूपैरगुरुजै राजन् जाल-
रंध्रविनिर्गतैः ५

यतियत्त्वेति २ गृहे तान्व स्त्रीपुंभोग्यानि मंदिरमनुवर्ण्य यत्नितस्मिन्निति तत्त्वगृहे नानाविधमासि खलु महद्भ्राजन्ति मुक्तादामानि तेषां विलंबा
सं लियस्मिन्नृत्तेन वितानेन विराजितं तत्त्वो यांताना विराजितपर्यन्तान्वयः ३ सुगंधितया द्विरेफकुलैर्नादिते ४ प्रविशद्भिश्चंद्ररश्मिभि

राम
३०

[illegible]

मोदहेतोस्तस्थापयामास सुमृष्टाः कमनीया अतो विरजांसि वराणि अम्बराणि याभिस्ताः नरयानैः शिबिकाभिः अपि च महाकोशानिति ३६ सप्रियः सत्यभामा
सहितः ३८ ३९ गृहोद्यानानि तत्पुष्पमुपशोभयतीति तथा ४० सेन्द्रान्विबुधान्निर्जित्येति कलहो संग्रामः उक्तः तत्र ननु कथं प्रसाधितस्त्वम
नोरथेन श्रीकृष्णेन महेन्द्रस्य संग्राम इत्याशंक्याह ययाचेति अच्युतं अर्थसाधनमिति च कर्मव्यत्ययाच्चतिधातोर्विग्रह इति विग्रहं करोति म

ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोम्बराः नरयानैर्महाकोशान्रथाश्वान्द्रविणं महत् ३६ ऐरावतकुलेभांश्च चतुर्दन्तां।
स्तरस्विनः पाण्डुरांश्च चतुष्षष्टिं प्रेषयामास केशवः ३७ गत्वा सुरेन्द्रभवनं दत्त्वादित्यै च कुण्डले पूजितस्त्रिदशेन्द्रेण महेन्द्राण्या च सा।
प्रियः ३८ चोदितो भार्ययोत्पाट्य पारिजातं गरुत्मति आरोप्य सेन्द्रान्विबुधान्निर्जित्योपानयत्पुरं ३९ स्थापितः सत्य
भामाया गृहोद्यानोपशोभनः अन्वगुर्भ्रमराः स्वर्गात्तद्गन्धासवलम्पटाः ४० ययाच आनम्य किरीटकोटिभिः पादौ।
स्पृशन्नच्युतमर्थसाधनम् सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धिगाढ्यतां ४१ अथो मुहूर्त एकस्मिन्नाना।
हा२ गारेषु ताः स्त्रियः यथोपयेमे भगवान् तावद्रूपधरोऽव्ययः ४२ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थि
तः रेमे रमाभिर्निजकामसम्प्लुतो यथेतरो गार्हकमेधिकांश्चरन् ४३

हान्नपितमः क्रोधः आशान्तं धनिकानां धिगिति च ४१ ४२ यथायथावत् अनेन नेह च व्योदेवं पुनः न समागमोऽपि प्रतिगृहं यौगपद्येन सूचि
तः अव्ययः सर्वत्रापि सम्पूर्ण एव ४२ अहोभाग्यं नारीणामित्याह द्वाभ्यां गृहेष्विति अतर्क्याणि कर्माणि करोतीति तथा सः निरस्तं साम्य
अतिशयश्च येन तेषु गृहेष्ववस्थितः रमाभिः लक्ष्म्या अंशभूताभिर्निजकामसम्प्लुतः स्वानन्दपूर्णः गार्हकमेधिकान्गृ
हस्थधर्मान् ४३

भा०द०उ० किंच मापश्ः राजभ्यो जरासंधादिभ्यो बिभ्यतः भयं प्राप्नुवंतः १२ अस्पष्टवर्त्मनां अविज्ञातचारणां अलोकपथं अलोकपारं तं पदवीं मा
३१ र्गं आस्थिताः अनुष्ठिताः १३ किंचनं किंचनांशं नि १४ आत्मसमं परस्परमनुरूपं जन्मैश्वर्याभ्यां सहिताः आकृतिः रूपं जातिः सर्वो
सन्मानभवः आयतिरुत्तरकालः १५ न दीर्घा समीक्षा विचारो यस्यास्तया १६ अथ इदानीमपि १७ तर्हि किमित्यानीताहमिति चेद् तत्रा

राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणंगतान् बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् १२ अस्पष्टवर्त्मनांपुंसामलोक
पथमीयुषां आस्थितापदवीं सुभ्रु प्रायः सीदंति योषितः १३ निःकिंचना वयंशश्वन्निःकिंचनजनप्रिया तस्मात्प्राये
णनह्याढ्या मांभजंति सुमध्यमे १४ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्व
चित् १५ वैदर्भ्येतदविज्ञाय त्वयादीर्घसमीक्षया वृतावयंगुणैर्हीनाः भिक्षुभिः श्लाघितामुधा १६ अथात्मनोनुरूपं वै
भजस्वक्षत्रियर्षभं येनत्वमाशिषः सत्याः इहामुत्रचलप्स्यसे १७ चैद्यसाल्वजरासंधदंतवक्रादयोनृपाः ममद्विषं
ति वामोरु रुक्मी चापितवाग्रजः १८ तेषांवीर्यमदांधानां दृप्तानांस्मयनुत्तये आनीतासि मया भद्रे तेजोपहरतासतां
१९ उदासीनाः वयंनूनं नस्त्र्यपत्यार्थकामुकाः आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योतिरक्रियाः २० श्रीबादरायणिरु
वाच एतावदुक्त्वा भगवानात्मानं वल्लभामिव मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् २१ इति त्रिलोकेशपतेस्तदा
त्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ह २२

शंक्याह चैद्येति मम मां द्विषंति १८ स्मयनुत्तये गर्वापनयनाय १९ स्त्रीणामपि निःस्पृहमौदासीन्यमकामत्वं चाह उदासीना इ
ति गेहयोः गेहदेहयोः उदासीना वयं अत एव ज्योतिरक्रियाः ज्योतिः प्रदीपादि तद्वत् साक्षिमात्रतया क्रियारहिता आस्महे व रामः
र्तामहे २० अविश्लेषाद्धेतोरात्मानमेव तं वार्य इव शाहः २२ ३१

पयसः फेनस्य फेनवत् धवलं पर्यंके स्थितं कशिपूत्तमे सुखासीनं हरिं तल्लिकायां उपस्थाय असेवत ६ तद्देवी मेनपति बालव्यजनं धृत्वा पाणौ
तं अच्युतं उपासां चक्रे मणिनूपुराभ्यां रेजे क्वणयती मणिनूपुराभ्यां यथा नूपुरौ कूजयतः तथा अंगुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्र
यस्याः सा वस्त्रांतेन गूढौ यस्यास्तौ कुचौ तयोः कुंकुमं तेन शोणो हारस्तस्य भासा नितंबे धृतया परार्ध्या अमूल्या कांच्या तया
चरेजे ९ तां निरीक्ष्य प्रीतः सन् स्मयमानो हरिराबभाषे कथंभूतां लीलया धृततनोस्तस्य अनुरूपरूपा अनुरूपं स्वरूपं यस्यां तां

पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे उपतस्थे सुखासीनं जगतामीश्वरं पतिं ६ वालव्यजनमादाय रत्नदंडं सखी
करात् तेन वीजयती देवी उपासांचक्र ईश्वरं ७ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रह
स्ता वस्त्रांतगूढकुचकुंकुमशोणहारभासा नितंबधृतया च परार्ध्यकांच्या ८ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य याली
लया धृततनोरनुरूपरूपा प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ९ श्रीभगवानु
वाच राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः १० तान्प्राप्तानर्थिनो हि
त्वा चैद्यादीन्स्मरदुर्मदान् दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषे समान् ११

यद्योक्तं अपरत्र देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमिति विंकालकैः कुंडलाभ्यां
निष्केन पदकेनालंकृतकंठेन च चतुर्दिक्षु शोभितेन वक्त्रेण उल्लसन्ती स्मितामृतसुधा यस्यास्तां ९ सर्वगुणयुक्ता या अभिप्रेता बुद्धिमंदेत्याशये
न हे राजपुत्रि त्वं ईप्सिता दृशोभिः हे राजपुत्रि लोकपालानामिव भूतिरैश्वर्यं येषां तैः तथा महानुभावैः गाढैः रूपादिभिर्जितैः
अपूर्वैर्भूपैरीप्सितासि १० तान्हित्वा नोऽस्मानस्मान् कस्माद्वृतवत्यसि ११

भा॰१०॰३॰ ननुकलहेकिंकौतुकंसुखंवाअतआह अयंहीतिनर्मैःनर्मोक्तिभिःयामःकालः ३१ ३२ भगवताऽस्तस्याएश्वर्यमुक्तंमुखंसव्रीडहासेनरु
३२ चिरस्निग्धेनापांगेनवीक्षमाणाअसमत्वभयंदुर्गाश्रयणमत्वेनेःकलिःअराजकत्वमविज्ञातालौकिकेहावसादनेनिःकिंचनत्वंत॒।
स्मीतिराघ्यानादरणीयत्वाअनौचित्यनिर्गुणत्वमथास्याघाचाभिक्षुभिः औदासीन्यमकामत्वंवदेोषानुवाडशात्मनःअशत्वाददोषे।
दर्शितेमेभ्माराज्ञांवहन्नुगुणान्कसलनिर्मोद्दितान्मेष्मोन्यपेधतगुणत्वेभगवतःस्वानिदोषपराणिपानिवचनानितानिसर्वोत्कर्षप

32

अयंहिपरमोलाभोगृहेषुगृहमेधिनां यन्नर्मैर्नीयतेयामोप्रियया भीरुभामिनि ३१ श्रीशुकउवाच सैवंभगवता
राजन्वैदर्भीपरिसांत्विता ज्ञात्वातत्परिहासोक्तिंप्रियत्यागभयंजहौ ३२ बभाषेऋषभंपुंसांवीक्षंतीभगवन्मुख
सव्रीडहासरुचिरस्निग्धापांगेनभारत ३३ रुक्मिण्युवाच नन्वेवमेतदरविंदविलोचनाह यद्वैभवान्भगवतो
सदृशीविभूम्नः क्वस्वेमहिम्न्यभिरतोभगवांस्त्र्यधीशः क्वाहंगुणप्रकृतिरज्ञगृहीतपादा ३४ श्रीरामचंद्रायनमः

रत्नयामाचत्ताणाप्रतिवभाषेते ३३ तत्रयदुक्तं कस्मान्नोवृणीषेऽसमानित्तत्रासाम्यंसत्यमेवेत्याह नन्वेवमितिहे अरविंदविलोच।
न अधीशात्र्यानांब्रह्मादीनामप्यधीशोनियंतात्वंक्व क्वाहंगुणप्रकृति त्रिगुणस्वभावाप्रकृतिःगुणमयीप्रकृतिर्वानत्वनुत्वमेवाधी।
श्वरीश्रीःसर्वरूपास्मीत्यादित्यतआह अहो सकामैर्गृहीतोयादोयस्यसा ३४ राम ३२

विंतालतरुणमाहपदंतेनखेरुरुणश्रीकांतिपेस्यतेनसुजातेनसुकोमलेनपदा २३ सुखदुःखंअपियश्रवणात् भयंत्यागशोकयाशोक
ःअनुतापेसतिविनष्टाबुद्धिर्यस्याःअथातिपतंतिवलयानियस्मात्तत्कृतात् देहश्चपपात विक्लवाअचशाधीर्यस्यातस्याः २४ हास्यस्य
प्रौढिंगांभीर्यं २५ चतुर्भुजइत्तत्स्थापनाश्लेषणचक्रपरमात्मनाघर्षणंआदिः कृतवचतुर्भुजइत्यर्थः समुत्थनिवध्य २६ अंककलेश्क
मःश्रोभितेश्वचाशोकास्तुभिः सांत्वयामाससअनुनीतवान् २७ मामांत्वद्वचः किंसुवदिष्यसीतिश्रोतुकामेनअतुमिच्छतादित्यल्पा

पदासुजातेननखारुणश्रियामुवंलिखंत्यश्वाभिरंजनासितैः आसिंचतीकुंकुमरूषितौस्तनौतस्थावधोमुख्यतिदुः
खरुद्धवाक् २३ तस्याःसुदुःखभयशोकविनष्टबुद्धेर्हस्तात् श्लथद्वलयतोव्यजनंपपात देहश्चविक्लवधियःसहसे
वमुह्यन्रंभेववातविहतात्प्रविकीर्यकेशान् २४ तद्दृष्टभगवान्कृष्णःप्रियायाःप्रेमबंधनम् हास्यप्रौढिमजानंत्याः।
करुणःसोन्वकंपतः २५ पर्यंकादवरुह्याशुतामुत्थाप्यचतुर्भुजः केशान्समुह्यतद्वक्त्रं प्रामृजत्पद्मपाणिना २६ प्र।
मृज्याश्रुकलेनेत्रेस्तनौचोपहतौशुचा आश्लिष्यबाहुनाराजन्ननन्यविषयांसतीं २७ सांत्वयामाससांत्वज्ञःकृप।
याकृपणांप्रभुः हास्यप्रौढिभ्रमच्चित्तामतदर्हांसतांगतिः २८ श्रीभगवानुवाच मामावैदर्भ्यसूयेथाजानेत्वांम।
त्परायणां त्वद्वचःश्रोतुकामेनक्ष्वेल्याचरितमंगने २९ मुखंचप्रेमसंरंभस्फुरिताधरमीक्षितुं कटाक्षेपारुणापां
गसुंदरभ्रुकुटीतटं ३०

नर्मणाएवमाचरितमुक्तंनतत्वतः हेअंगनेसुंदर २८ प्रेमसंरंभेणप्रणकोपेनस्फुरितोकंपितोअधरोयस्मिन्तत्तत्कटाक्षेन
कटाक्षस्तेनयेअरुणेअपांगोयस्मिन्तत् अतएवसुंदरकुटिलभ्रुकुटितटंयस्मिंन्तत् ३०

३२ नः किंचनावयंशश्वन्निः किंचनजनप्रियः तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमइत्येतच्छ्लोकोक्तदोषद्वयंपरिहरति ॥ निः
किंचनइति । दरिद्रत्वंकेनिः किंचनत्वंतुनधनपटलेद्रूप्याह । यस्माइति अन्यतोबलिः भुजः इज्याअपिब्रह्मादयोयस्मैतवबलिं
बलिंहरंतितस्यसर्वेश्वरस्यभवतोदरिद्रत्वानघटेइत्यर्थः ॥ निःकिंचनजनप्रियाइत्यत्रतत्पुरुषेणसमासेनबहुव्रीहिणा
समासेनवानिंदास्पादितिस्वयमप्युभयथास्तोतिप्रेष्ठोभवानितितेनविन्नवस्तुपचरणदोषद्वयये ॥ निष्किंचनाः
निःकिंचनाविद्यावित्तम् । विद्याचरणाः निष्किंचनाविनैर्निःकिंचनः वलिभुजांब्रह्मादीनामात्मीकेश्वराणांप्रेष्टः तेपितुभ्यं
प्रयच्छंतिवेति । तस्मात्प्रायेणनह्याढ्यामांभजंतीत्यस्योत्तरंनत्वांविदंतीति आढ्यतयांधाः ह्याह्याः अंधत्वेनकेनविदंति ॥ अंतकं
असुतृपः असुतृपत्वेनवतर्पयंतिनह्याढ्यामांभजंतीत्यर्थः ॥२॥ बलिभुजामपिभवान्प्रेष्ठइत्यत्रहेतुंवदन्यमोरेवसमंचिन्नमित्यनेनोक्त

33 निःकिंचनोननुभवान्नयतोस्तिकिंचिद्यस्मैबलिंबलिभुजोपिहरंत्यजाद्याः ॥ नत्वांविदंत्यसुतृपोंतकमाढ्यतांधाः प्रेष्ठो
भवान्बलिभुजामपितेपितुभ्यं ॥३७॥ त्वंवैसमस्तपुरुषार्थमयः फलात्मा यद्वांछयासुमतयोविसृजंतिकृत्स्नं ॥ ते
षांविभोसमुचितोभवतःसमाजः पुंसःस्त्रियाश्चरतयोःसुखदुःखयोर्न ॥३८॥ त्वंन्यस्तदंडमुनिभिर्गदितानु
भावआत्मात्मदश्चजगतामितिमेवृतोसि ॥ हित्वाभवद्भ्रुवउदीरितकालवेगध्वस्ताशिषोब्जभवनाकपतीन्कुतोन्ये ॥३९॥

मनोचित्यपरिहरति त्वंवाइति । फलात्मापरमानंदस्वरूपः एतस्यैवानंदस्यमात्रानिभूतानिमात्राम्युपजीवंतीतिश्रुतेः स
माजः सेव्यसेवकलक्षणसंबंधः ननुपुंसःस्त्रियाश्चरतयोः ॥ अतएवनत्वत्तनसुखदुःखिनोःसदाकलहकारित्यर्थः
नभिक्षुभिः आत्माधिनप्रभृत्यस्यपरिहारः आत्मेतिपदत्रयेसर्वप्रियेनस्वजगतामात्मानःस्वयंवरणेनतत्पर्यं ॥ किंच
स्वात्मादयइति । वेदश्चनिरस्तविस्मापयद्ददोषादीन्सभीलक्षयेतिमन्तान्मिनुतोदोषद्वयंपरिहरति इति ॥ इति मात्रेसवमेमया
वृतोसीत्यज्ञानपरिहारश्च ॥ हित्वेत्यादौसमासानापरिहारः भवतोभ्रुवःसकाशादुदीरितोयःकालःतस्यवेगस्ते
नध्वस्ताःआशिषोयेषांतान् ॥ ब्रह्मादीनपिविहायकुतोन्येवराका इत्यर्थः ॥३९॥ श्रीकृष्णनारायणपरमहंसः कृष्ण ३२

यदुक्तं राजन्योऽविधिवत् सम्यक् समुद्रेश्वरणं गतानिति तत्राह । सत्यमिति । हे उरुक्रमेति भया नार्व दर्शयति गुणाः शब्दादय एव राजंत इति राजानः सोपाया
दिवेति यतः हृदये समुद्रे तद्दृग्भोगविषयाकारैरपरिशिष्टश्च न इत्यर्थः । शेते निश्चलतया प्रकाशते । उपलंभनमात्रः चैतन्यघनः आत्मा ग
र्वानिमि [illegible] वस्तुवद्भिः लोके तद्दर्शनानिति । यदुक्तं तदपि सत्यमित्याह । नित्यमिति । कदिंद्रियगणैः कुत्सितैर्विहिर्मुखैरिंद्रियग
णैः अन्यथाभिप्रायेण बहुवचनं । कुत्सितं इंद्रियगणे लो । यथाभिनिवातैस्वनित्यं कृतविग्रहः [illegible] । यदुक्तं सन्नकं न्यपा
सभानानि लघुकं भवेत्याह । त्वत्सेवकैरिति । नृपाणां पदमासनं [illegible] नम एव न तत् ॥ अविवेकबहुलत्वात् त्वत्सेवके

सत्यं भयादिवगुणे ह्युरुक्रमांघ्रेः प्रोते समुद्र उपलंभनमात्र आत्मा नित्यं कदिंद्रियगणैः कृतविग्र
हत्वं त्वत्सेवकैर्नृपपदं विधुतं नमोऽस्तु ॥२४॥ त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभि
र्ननु दुर्विभाव्यं । यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंति ॥२५॥ श्रीध

रेवलनं त्यक्तं । किंपुनर्वक्तव्यं त्वयान्यक्तमिति ॥ अयस्य स्वधर्मेण पुंसां मलोकपदमीयुषामिति यदुक्तं तदपि तथैवेत्या
ह । त्वत्पादेति । नृपशुभिर्नराकारैः पशुभिः । किंपुनर्वक्तव्यं तत्र वर्त्मनो अस्फुटत्वमिति ॥ किंच यस्मात् भवंतमनुवर्तंते ॥
तेषामपीहितमलौकिकमिव । अयं भावः किंपुनर्वक्तव्यं तवेश्वरस्येहितमलौकिकमित्यर्थः ॥ प्रास्थिताः पदवी
मुमुक्षवः सीदंतीत्यो [illegible] इति ॥ अस्यापरिहारं वदंति यद्वा [illegible] पंचमश्लोके ॥२५॥ श्रीरामनारायण

भा०द०३०

२९ अतस्त्वामेवात्मभजनमिति नाह तं त्वेति प्रार्थयते स्यादिति अरणं शरणं स्थितिर्देवतिर्यगादिर्जन्मभिः पाठान्तरे त
र्थवाद कुलके धर्म श्रवणे इत्यर्थः कथंभूतस्य तव यस्य अन्तकस्य संसारस्य अपवर्गो नाशो यस्मात्तः भजतेषु
यथा निः आत्मसात्करोति तस्य तव अंघ्रिमिति भीतस्य हि शरणमेवानुरूपं भजने योग्यं अतः तामहम भजामित्य
र्थः भयोक्ता तां बहु दोषगुणा राजपुत्रि ताश्च पेर्लोकपाल विभूति मित्यादिना तत्र सेवक सत्यं संतोषितजोगचा
ह दाभ्यां तस्याः स्फुरितेति स्वपादद्वके बलंभार वाहः गात्रेन लीवदी इव नित्य व्यापार निषेषः स्वानश्वानमता विधा

३० तं तानुरूपमभजं गोप्ताम धीरा मान्यानमत्र च यस्त्व च कामधेनुं स्यान्मे तवांघ्रिशरणं स्तनिमिन्ये मंस्यायो वैभ जेत
२ भा मनुयात्मन्मोपवर्गः ४२ तस्याः स्फुरच्युनन्टपा भवतोपदिष्टाः स्त्री णांश्रेष्ठेषु स्वरङ्गो भुविशाल भवत्याः
यत्क्षणम्स लभति कर्षणे नोपयाघधुयं कथाम्स्टुविरेचि वसमानुगीता ४३ त्वकुरमसुरो मनस्व केमापिन
कमनमां सास्थिरक्त कामिविक्र कपपित्तवातं जीवत्शवं भजति कांतमतिर्विमुक्ता प्रीतपदां त्वमकरंदमजिघ्र
तीस्त्री ४४ प्रसंगं भुजार्हममते चरणानुरागश्रामोस्य समयिचाव्यतिरिक्त दृष्टेः यद्विस्वनं त्वयउपात्तरजोत्तिमा

लाइव कृपणाः हिंसाम्बभरत्वाइव किंकराः तथा स्वस्याउं भगायाः पतय स्युः यस्याः कापि पयं त्वत्कयान प्राप्नुयादिति तथाहि
तेप दाङ्वमकरंद जिघ्रती सती यास्त्री विमृष्ठा मांकान्ताय मिति मातिर्यस्याः सा कांतमतिः जिवछं च भजति तथाहि निर्वहिः
पिनकछनं अंतर्मांसादि मयमिति यदुक्तं मुदासीना वयमित्यादि तत्राह प्रस्थितिः यद्यपि त्वं निरपेक्षः तथापि ममते चरणेनु रामः
रागोस्ति सचिचम अव्यतिरिक्ताः प्रतिशयः वती हि हर्षे एस्पते आत्मन आत्मन्येव रतस्य तर्हि तत्र तेन कोलाभः म चरणानुरागएवम
हानलाभः किंच यर्हि अस्य विश्वस्य रक्षये उपात्तो रजसोतिमात्रो लक्ष्यं येन सः तथाभूतः सन्मामी हसे उपयाचाह हर्षितदवनः परमोऽकृपाः प्रत्यनुग्रह इति॥ २९

स्वाश्वानं परिहृत्य पुरुषाणां गुणवर्णनप्रकारः प्रकोपसंरंभेण तस्मिन्नेवाज्ञानमापादयति जाड्यमिति सिंहो यथा
यस्मात् विद्राव्य स्वबलिं हरति तथा जाड्यं धनुर्निनादेन वज्रराजादीन् विद्राव्य मांत्स्य भागं स्त्रियं यः वज्रहस्तवान्
स तस्य नवराज्यं भयादुदधिं प्रपन्न इति यद्वा भावणेन ज्ञाधं [illegible] घृतत इत्यर्थः ३९ पत्र्यान्यत् अयमेव वर्ति
नामन्यादिनी यां त्वां भजन्ते सीदन्त आ [illegible] त्वमुक्तं तदापि मंदमेवेत्याह यत्रात्मुये इति यस्य तव भजनं
[illegible] यान्यान्नमाः अंगाविलास्यापितावि एपः पृथु जायन्ते भरतः नाद्युषो यथा नि गयम्भादिर्षियां नय एनं नवपदं वो

जाड्यं वचस्तव गदाम जयस्तु भूपान् विद्राव्य यांड्डिनिनदैर्जहर्ष भागं सिंहो यथा स्वबलिमीयापकं स्य भागं ते
ऽभयादुदधिमपरं प्रपन्नः ३९ यत्रां घुयान् पापि त्वा प्रणयां ग येण जायंतु नाहुषमदादयरेकपत्नं
राज्यं विसृज्य विविधं वनमेव जाता सीदन्ति नानुपदवीन इहास्थिताः किं ४० कान्यं अयेन नवपादसरोज
गंधमाघ्राय मनसुरवर्तिजनतापवर्गी लक्ष्मीलयं त्व विगलाप्य गुणालयस्य मन्त्री सदोऽभयमयी विविक्तं इहैः ४१

मार्गमास्थिनास्ते किं सीदंति न सीदंत्येव अपितु त्वत्पदप्राप्ताइत्यर्थः एवं च कोपाविशेनावसादनस्य परिहारीद
स्यघवर्तिनामित्येतद्दानेनर्थी विहाया क्रोशकर्षः यथाह अयात्मनारूपमिति तन्त्राह कान्यामिति निम्लोकहृये
न गुणानामालीयस्य नवपादसरोजगंधं जनतापी अपवर्गी मोक्षरूपं लक्ष्म्या आयेन तस्यैवं सद्रि महाद्रुमु
रवारतं व किलि आघ्रायत म विगलस्य मन्त्रीमरणे धार्मिकाः सदा अभयं यस्यात मन्यं कान्त्री अयन सेवत
अर्थी विविक्ताहार्थस्य पैस्सा गुणालयस्य ममनेनगुणैर्हीना इति यदुक्तं तदपास्तं ४१ श्रीकृष्णायनमः श्री

मा०द०उ०

३५ तस्मात् हे स्वामिन् त्वयाऽपि भवमोचनी निःकामानुवर्त्तिः कृतार्थेन दिष्ट्या भवं कथं भर्त्ता खले सुदुःकरा दुराशिषो दुरभिप्रा
याया अत एव शुभसंभारया आपन्नर्थपरया निष्कृतिजुषा वचनपरया स्त्रिया सुतरामसाधनुवर्त्तितुं दुःकरा इति किंच
सति निःकामाः प्रेमैणैव मय्यनुवर्त्तमाना बहुवः किं तु त्वया सदृशी कापि न मया मिलिता तस्मात् निवर्त्तमानेन मया भर्त्ता
न त्वादृशी मिलिता त्रिभिः उपस्कृता सत्यः हे पाय स्वनर्थ्येऽस्मि परीणाहपर्वांगि अभिनव विवाह प्रसंगे दृष्टे चुतसभायां तस्य
मङ्गलानुबंधं तस्मिन् काले कालांतरे तदनुस्मरणेन पुनःपुनः सत्कृतं दुःखं मम स्मा इति योऽसौ वियोग सम्प्राप्ती त्यौ प्रसहः सोऽप्य

दिष्ट्या गते हे स्वर्ये पतिनः न्यपि त्वया कृतानुवर्त्तिभवमोचनी खले ॥ सुदुःकरा सोऽसुतरां दुराशिषो हृष्टं भर्त्तया निः
कामैर्जुषः स्त्रियाः ॥ पत्र न त्वादृशी प्रणयिनी गृहिणी गृहेषु परणाम्मया मिलिता यथा त्वां विवाहकाले प्राप्तानन्दपा
नवगणित्यराहो हते मे प्रस्था पिता द्विजउपस्कृता सकृत्य यस्याः ॥ आत्मानु बिंदू पकरणं प्रणिति जितिस्तयो दाह पर्वणि
मु २ चतद् धमशास्त्रेणां ॥ दुःखं संस्थमसहो मम दयोगभीत्या नेवाप्रवां किमपि तेन वच जिता तौ ॥ यादृत स्त्रयालं
लभते सु विवित्तमंत्रः प्रस्थापितो मयि चिरायान्यमनन्त ॥ सर्वाजिहाम इदमंगमनन्यया जोति छन्नसोथव

त्पउसि धनेनैवानिनेवा निरुद्धविरुद्धविवादानं तत्पयस्य ज्ञानव्यंतिः अपिच इत इति ॥ आत्मलाभेन मत्तार्थैः मयि चिराय ८
लिपिवाभाति नितिविवाहे प्राप्तत्व्यमितिकृतेन समये कथं चिद् दत्ता पुवतिन्य मितिगहितं स्नेह सत्कार इदमनन्यया तव मंगलं जि हा
मत्यवृत्तमिच्छामि ॥ पदामीन्येव दूतप्रस्थापितः ॥ यथाऽयं स्वयं ॥ यद्यं जात्वलभेय भवत्सादं जयामसलन्द्रतः ८
शां छन्नजन्म भिलाभिति ॥ एवं ॥ प्रतिजिहाम इतिच्छेदः त्यक्तुमिच्छुत्यर्थः तत्रैव कमिति च्ययैव मितिच्छेत ॥ तत
मिति कर्तुमशक्यामित्यर्थः ॥ किं तु केवलं त्वां प्रतिदिनं दयामहर्षे यामि इति ॥ ६५ ॥ श्री श्री श्री श्री श्री श्री श्री श्री

३५

तदेवं तदन्तं सर्वं प्रतिव्याख्याय तन्मध्ये चिन्नामेत्रमुपदिदेशाह। इह भ्रांनैवेति। प्रयात्मनो रूपमित्यादिने
तद्वचः। प्रलीक मिथ्येति नैवमन्ये। यतः लोके कन्यायाः एव कश्चिद्रतिर्भवति। यथा काचिद्राजकन्या प्रजा
नां प्रविको प्रवालिकाएंतिस्मरणं मध्ये। प्रवालया कन्यायाः एव भावे रतिर्जाता तद्वदेव मूढायाः परि
णीतायाः प्रीति। भयस्मात् इह परलोकहयच्युतः भ्रष्ट इति प्रलंभिता उपहसिता सि। अन्वास्य प्रारब्धात्त
वती। भाग्य एकांत भक्तायामेकामाः संत्येव अकामायकाम निवर्त्तये मोक्षपर्यंवसायिन इत्यर्थः। अनुवादे

नैवालीकमहं मन्ये वचस्ते मधुसूदन। प्रंबायाश्च हि प्रायः कन्यायाः स्यादिति कश्चित्॥ ४६॥ अरुणा याख्या
पिपुंश्चल्याम मेऽस्मिन्नवं नवं। बुधो पतीं न विभ्रियान्नां विभ्रत्उभयच्युतः॥ ४७॥ श्रीभगवानुवाच॥
सा ध्वेतद्धि नु कामैस्त्वं राजपुत्रि प्रलंभिता। मनो दितं यदन्यास्मिं सर्वं तत्सत्यमेव हि॥ ४८॥ यान् कामान्
२ सकामास्मिन्कामायकामिनी। संति ह्येकांतभक्तायास्तावकल्पाणि नान्यदा॥ ४९॥ उपलब्धं पतिप्रेमपारि
ब्रान्तं व्रते न च। यया वैष्याल्यमाना पोनधीर्भ्याप्यपकारिणी॥ ५०॥ विमो भजेति दांपत्यं तपसा व्रतचर्यया।
कामात्मानोपवर्गोयमोहितामम मायया॥ ५१॥ मां प्राप्यमानिन्य पवर्गसंपदं वा छतियसंपदर
वतन्नाते तेनंदभाग्या निरये पि यैन्ट तन्मात्रात्मकत्वान्निरयः सुसंगाम॥ ५२॥ श्रीकृष्णरामनाराय

नवरात्रदह्नातामभिनंदति। उपलब्धमिति यत्पस्मात्त्वयि वर्तमानं धाः नायक धितानात्मविषयाजाता। एकांतभक्तिम
भिनेधिता पि व दृष्टा कर्त्तुं सकामाभक्ता निंदति। येमामिति। दांपत्यं दांपत्यसुखभोगसुखाद्धि। मा कामो हितत्वमेवापपाद
यति। मांप्राप्येति। अपवर्गेत्यादौ पाम्निन् तन्मां प्राप्य प्रसादाद्ये केवलसंपदं एवापि प्रयान्न वांछंति तेनानुमानत्पातितासां
संपदामपि मोहमेव यतिस्यं चो विषयानिरयेपि प्रतिनिह्नूयानाद्विपताम् किंचते धां मात्रात्मकत्वात्विषया

तासां विभ्रमरन्चयंति जेनाधिरोति स्मायोति स्मापोग जहविनंतं धुनं प्रवलोकलवः कदाचित्तेन दोर्यातः स्र
विनो भावाभिप्रायः तेन हरिर्मनोहरणशीलं यत् तां मंडले तेन गृहितोः श्रस्या पिता ये सौरता मंत्रांते षुघोडेः
प्रगल्भेः श्रनंगस्य वाणैः घातैरन्थैश्च करणेः कामपाशैश्च प्रसिद्धैर्येषां द्विषं मनो विमर्थितं दोमर्थितुं षोडश
सहस्रमपि पत्यौ न शेकुरिति ॥४॥ अनुरागेण हासावलोकस्थानेन च संगमेलालसं श्रोत्सुक्यं चातो ग्धाद्यायस्य

स्मायावलोकलवदर्शितभावहारि भ्रमंडलप्रहितसौरतमंत्रशौडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबा
णैः यस्येंद्रियं विमथितुं करणैर्न शेकुः ॥ ५ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः प
दवी यदीयां ॥ मेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमजल्पलज्जा ॥६॥ प्रत्युद्गमासनवरार्ह
णपादशौचताम्बूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसाधनशयनस्नापनोपहार्यैर्दासीशता अ
पि विभोर्विदधुः स्मदास्य ॥ ७ ॥ तासां यादशपुत्राणां कृष्णस्त्रीणां पुरोदिताः ॥ अष्टौ महिष्यस्तत्पुत्रा प्र
द्युम्नादा ... गृणामि ते ॥ ८ ॥ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचा
रुस्तथापरः ॥ ९ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पि
तुः ॥ १० ॥ भानुः स्वभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥ ११ ॥ श्र

वि ... ममकुंदवनं भेजुः श्रनुरागहासावलोकनवसंगमलालसान्यं भेजुः तस्य विजेतुं न शेकुरितिवा ॥ प्रत्युद्गमा
मनादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति ॥ प्रोचभाविपिनवसंगमाद्यभिमानं श्रागतमेतत्तेनौत्सुक्येन चनण्या
प्रतीते ः तेषामेव श्लोकानां प्रस्तावान् सेवनः पुनराद्य ... तिरिति सौंदर्यातया संगिकमुक्ताप्रश्नुतमाह ॥ तासामि

36

लक्ष्म

सौरतसंलापैः सुकृतनर्मगोष्ठीभिः॥ इति दशमे षष्टितमोऽध्यायः॥६०॥ एकषष्टितमे शौरेः पुत्रपौत्रादिसंततिः। अनिरुद्धविवाहे च रुक्मिणो रामतो वधः॥ षोडशाधिकशतोत्तर षोडशसहस्रस्त्रीसमृद्धवान्॥ कोटिशः पुत्रपौत्रादीन्दारेष्वजनयत्॥१॥ तदेव प्रक्रममाह एकैकश इति॥ कृष्णस्य अचला भार्याः सर्वाः॥ आत्मनि संपन्नतया पितुः॥ स

श्रीशुक उवाच॥ एवं सौरतसंलापैर्भगवान्जगदीश्वरः॥ स्वरतो रमया रेमे नरलोकं विडंबयन्॥५७॥ त थान्यासामपि विभुर्गृहेषु गृहवानिव॥ प्रास्थितो गृहमेधीयान्धर्मान्लोकगुरुर्हरिः॥५८॥ इति श्रीभाग वते महापुराणे दशमस्कंधे रुक्मिणीसंवादः षष्टितमोऽध्यायः॥६०॥ श्रीशुक उवाच॥ एकैकशस्ताः
तमानं२ कृष्णस्य पुत्रान्दशदशाबलाः॥ अजीजनन्ननवमान्पितुः सर्वात्मसंपदा॥१॥ गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितं॥ प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः॥२॥ चार्वब्जकोशवदनायतबाहु नेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनि

कामादनवनात्॥२॥ प्रेष्ठं न्यमंसत अच्युतस्य प्रियतमं प्रत्येकं स्वं स्वं मेनिरे॥ न तत्त्वज्ञाः॥ आत्मारामं तं मन्तुं हृदयेन॥ चार्विति॥ चार्वब्जकोशवद्वदनं आयतानि च बाहुनेत्राणि च सप्रेमहासरसेन वीक्षितानि च॥ वल्गुजल्पाश्च॥ भगवतो गुणैः संमोहिता वनिताः स्वैः स्वैरनेकैर्विभ्रमैस्तस्य मनो विजेतुं न समर्थाः कर्तुं॥ नशक्ता बभूवुः॥ विभुम्नः परिपूर्णस्य॥३॥ श्री श्री श्री कृष्णनारायण श्री

भा०द०उ०

३७ ॰पुं पः कृष्णं हंतुं रंध्रं प्रतीक्षमाणस्य कथं प्रादादिति वैवाहिकं वैवाहनिमित्तं कर्म किमभिप्रायं कथं जानासि इति वदेत्याह। अना
गतमिति। श्रुत्वा द्वयं प्रसन्नार्थं। द्विपयोश्चरौ। विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यंतरितं। तत्रोत्तरं स्वयंवरे तु रुक्मवत्या
रुक्मिण्यः समर्पणार्थो निर्जित्य जहारेति। यद्यपि पद्यी कृष्णावमानितः तथापि वैरमनुस्मरन्नपि व्यतरत् प्रादात्। प्र

॰अनागतमतीतं च वर्त्तमानमतींद्रियं। विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः ॥२२॥ श्रीशुक उवाच ॥ यद्यप्य
नुस्मरन्वैरं रुक्मी कृष्णावमानितः। व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं ॥२३॥ वृतः स्वयंवरे साक्षादनंगो
ऽङ्गयुतस्तया। राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥२४॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली।
उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥२५॥ दौहित्रायानिरुद्धाय पौत्रीं रुक्म्याददाद्धरेः। रोचनां बद्धवैरोऽपि स्व
सुः प्रियचिकीर्षया ॥२६॥ जानन्नधर्मं तद्यौनं स्नेहपाशानुबंधनः। तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ॥२७॥
पुरं भोजकटं जग्मुः सांबप्रद्युम्नकादयः। तस्मिन्निवृत्त उद्वाहे कालिंगप्रमुखा नृपाः ॥२८॥ दृप्तास्ते रुक्मिणं
प्रोचुर्बलमक्षैर्विनिर्जय। अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत् ॥२९॥ इत्युक्तो बलमाहूय तेनाक्षै रुक्म्य
दीव्यत। शतं सहस्रमयुतं रामस्तत्राददे पणं ॥३०॥ तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलं दन्तान्संदर्शयन्नुच्चैर्नामृष्य ॥

त्स्मोऽदत्तेत्यर्थः सर्वासामप्येका कन्या तत्सर्वविवाहोपलक्षणार्थं। ज्येष्ठकन्याविवाहमाह रुक्मिण्या इति यौनं विवा
हः तद्यौनमधर्मं जानन्निति। द्विषदन्नं न भोक्तव्यं द्विषंतं नैव भोजयेदित्यादि लोकविरोधात्। प्रत्यर्घ्यं कविहितं घ
र्ममध्याचरन्नास्तीति निषेधार्थेत्यर्थः लोकवत्स्वाचरणफलं वक्तुमाह तस्मिन्निति। अदीव्यत क्रीडितवान् ॥३१॥ ३७

विरश्चंद्रोश्वसेनश्च चित्रगुर्वेगवान्वृषः आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितोसुताः १३ २

श्रीभानिति । बलो: कुले वा विशेषणं ॥१३॥ भद्रो नाम एकलः सोमकः प्रवरः कनायान् एते कालिंद्याः सुताः शत ॥१४॥
माद्र्याः लक्ष्मणायाः ॥१५॥ क्षुधिश्च दशमः । एते मित्रविंदात्मजा ॥१६॥ संग्रामजित्प्रमुखाः सत्यकांता भद्रायाः
सुताः । एवं नामापि सैव । रोहिण्याः । सुता वा मुख्यान्यासामनुपलक्षणार्थाः । एतेषां चेति । अन्येषामपि श्रीकृ

श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥११॥ विजयश्चित्रके॥
न तुश्च वसुमान्द्रविडः क्रतुः ॥ जांबवत्याः सुता ह्येते सांबाद्याः पितृसंमताः ॥१२॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एक॥ लक्ष्मणाः
लः ॥ शांतिर्दर्शः पौर्णमासः कालिंद्याः सोमकोवरः ॥१४॥ प्रघोषो गात्रवान्सिंहो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः
पुत्रा महाशक्तिः सह ओजोपराजितः ॥१५॥ वृको हर्षोनिलो गृध्रो वर्धनोन्नाद एव च ॥ महाशः पावनो॥
वह्निर्मित्रविंदात्मजाः क्षुधिः ॥१६॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोरिजित् ॥ जयः सुभद्रो भद्रायाः॥
वाम आयुश्च सत्यकः ॥१७॥ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥ प्रद्युम्नाच्च निरुद्धोभूद्रुक्मवत्यां नः रुः
महाबलः ॥१८॥ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥१९॥
मातरः कृष्णजातीनां सहस्राणि च षोडश ॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥२०॥ कृष्णे
नाभिभूतस्तं हंतुं छिद्रप्रतीक्षते ॥ एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः ॥२१॥ श्रीकृष्णनारायणेन्मा:

स्वपुत्राणां पौत्राणां संख्यास्त्री पुत्रपुत्राः पौत्राश्च कोटिशो बभूवुः ॥ तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मार
यति ॥ मातरः ॥ कृष्णजातानामिति ॥ चशब्देनाधिका इत्यनुक्तं ॥२१॥

39

दिग्पुरुषाधिष्ठितमेषोक्तं मानितं दुम्परोधनं कन्यामाससमानात्स्ववाणेन वहुवाहुना ॥ अनिरुद्धो हृत्स्मिन्वा
णयाद्वसंयुगे श्रीमद्भागवहरं जयावाणवाहुनयाच्छिन्न पुराधिपं पुरपालकं कामान्पूरयतीति काम
राजोवाच वाणस्य तनयामूषामुपयेमे यदूत्तमः तत्र युद्धमभूद्घोरं हरिशंकरयोर्महत् १ एतत्सर्वं महायो
गिन्समाख्यातुमर्हसि श्रीशुक उवाच वाणः पुत्रशतज्येष्ठो वलेरासीन्महात्मनः येन वामनरूपाय हर
येऽदायि मेदिनी २ तस्यौरसः सुतो वाणः शिवभक्तिपरः सदा मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः ३
शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा तस्य शंभोः प्रसादेन किंकरा इव तेऽमराः ४ सहस्रवाहुर्वाद्येन तांडवे
ऽतोषयन्मृडं भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ४ वरेण छंदयामास स तं वव्रे पुराधिपं स एकदाह
गिरिशं पार्श्वस्थं वीर्यदुर्मदः ५ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजं नमस्ये त्वां महादेव लोकानां गुरुमी
श्वरं ६ पुंसामपूर्णकामानां कामपूरामरांघ्रिपं दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ७ त्रिलोक्यां प्रतियो
द्धारं न लभे त्वदृते समं कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहं ८ आद्यां चूर्णयन्नद्रीन्भीतास्तेपि प्रदुद्रुवुः ९
तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ९ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते इत्युक्तः कुमतिर्हृष्टः स्वगृह
प्राविशन्नृप १० प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिं ११ कन्यालभत
कांतेन प्रागदृष्टश्रुतेन सा सा तत्र तमपश्यंती क्वासि कांतेति वादिनी १२ सखीनां मध्य उत्तस्थौ विह्वला व्रीडि
ता भृशं वाणस्य मंत्री कुंभांडश्चित्रलेखा च तत्सुता १३ सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता कं त्वं मृगयसे सुभ्रु
कीदृशस्ते मनोरथः १४ हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये १५
परः स वा सावमरांगरूपः तं वा हे श्राधान भ्रतैर्दोर्भिरद्रीन्चूर्णयन् आनीयां प्रगच्छ सखीपि सनशनं नायं केतुर्भंगं प्रती

निःकारणं लक्षं ग्लहं पणं कृतवान् केतवं कपटं न्यर्बुदं दशकोटिं ग्लहं कृतमितो रामस्य आददे छलमाश्रितो रुक्मि

ततो लक्षं रुक्म्यगृह्णात् ग्लहं तत्राजयद्बलः जितवानहमित्याह रुक्मी कैतवमाश्रितः ॥३२॥ मन्युना क्षुभितः श्रीमान्स
मुद्र इव पर्वणि जातारुणाक्षोऽतिरुषा न्यर्बुदं ग्लहमाददे ॥३३॥ तं चापि जितवान्रामो धर्मेण छलमाश्रितः
रुक्मी जितं मयात्रेमे वदन्तु प्राश्निका इति ॥३४॥ तदाब्रवीन्नभोवाणी बलेनैव जितो ग्लहः ॥ धर्मतो वचनेनैव
रुक्मी वदति वै मृषा ॥३५॥ तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः संकर्षणं परिहसन्बभाषे कालनोदितः
॥३६॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः अक्षैर्दीव्यन्ति राजानो बाणैश्च न भवादृशाः ॥३७॥ रुक्मि
णैवमधिक्षिप्तो राजभिश्चोपहासितः क्रुद्धः परिघमुद्यम्य जघ्ने तं नृम्णसंसदि ॥३८॥ कलिंगराजं तरसा गृही
त्वा दशमे पदे दन्तानपातयत्क्रुद्धो योऽहसद्विवृतैर्द्विजैः ॥३९॥ अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः राजा
नो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥४०॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा रुक्मिणीबलयो रा
जन् स्नेहभंगभयाद्धरिः ॥४१॥ ततोऽनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीं रामादयो भोज
कदशार्हाः सिद्धाखिलार्था मधुसूदनाश्रयाः ॥४२॥ इति श्रीभागवते दशमस्कंधे महापुराणे

मया जितमित्यादि नृपलेसदि मंगलसभायां सूर्यया तवोढया सिद्धा अखिला अर्था अस्य तु दयं शत्रुवधादयोऽ
पेक्षिता ॥४२॥ इति दशमे टीकायां एकषष्टितमोऽध्यायः ॥ श्री कृष्णाय नमः ॥ गोपालजी श्री रामजी

भा०द०उ० ॰भ्रमणादिभिः ॰भ्रणाम्नाः ॰प्रघूर्णनं प्रमादो वा तद्रहितैः पाठांतरे ज्जुष्टा प्रेष्याम स्त्री यस्याः पुंभिर्दूषणं कृतो वीतिन
३६ जानीमः इति कामस्यात्मनो देहाज्जातं ॰प्रभितप्त्रया सर्वमंगलया तस्याः ॰अंगसंगेन स्तनकुंकुमं यस्यां स्त्रजि तां वा

॰भ्रमयाभिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ २८॥ कन्याया दूषणं पुंभिर्दुःप्रेक्ष्याया न विद्महे ॥ ततः प्रव्यथितो
39 बाणो दुहितुः श्रुत्वा दूषणं ॥ २९॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहं ॥ कामात्मजं तं भुवनैकसुंदरं श्या
मं पिशंगांबरमंबुजेक्षणं बृहद्भुजं कुंडल ॥ ॥ कुंतलत्विषा स्मितावलोकेन च मंडिताननं ३० दीव्यंतमक्षैः प्रि
ययाभिनृम्णया तदंगसंगस्तनकुंकुमस्त्रजं बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मि
तः ३१ स तं प्रविष्टं वृतमाततायिभिर्भटैरनेकैरवलोक्य माधवः उद्यम्य मौर्वं परिघं व्यवस्थितो यथांतको दं
डधरो जिघांसया ३२ जिघृक्षया तान्परितः प्रसर्पतः शुनो यथा सूकरयूथपोऽहनत् ते हन्यमाना भवनाद्विनि नि२
र्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ३३ तं नागपाशैर्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह उषा भृशं
शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरोदीत् ३४ इति श्रीभागवते दशमस्कंधे अनिरुद्धबंधनो नाम

ह्रोमेध्ये वृत्तः स्रग्धानं मधुमल्लिकाः वसंतभवा मल्लिकाः तदाश्रितां तस्याग्र इत्यादि संधिः तस्याग्र इत्यर्थः ॰आततायि
भिः उद्यतशस्त्रैः माधवोऽनिरुद्धः मौर्वं भूरुल्लोहविशेषलो निर्भिन्नाः शोकविषादाभ्यां विह्वला ॰अभवत् ॰अश्रुकणाक
लाविंदवो ययोस्ते ॰अक्षिणी यस्याः सा ॥ इति द्वाषष्टितमः ॥ श्रीगणेशाय नमः ॥ श्रीराम ३६

तथा दृष्टएव मम धैकोवा नवेदितो देवादी स्वप्नावस्था दे ग्रविवत् प्रद्युम्नं लिखितं वी इयम्बसुतायं इतिलज्जितमो
णेन पुरं नीत्वा कुंभिदुः प्रदेशे प्रदितु मम कैथा वरा धै स्मलैये: वास: स्रग्गंधादिभि: सभूषणपूर्वकमर्चित: मनः

उषोवाच ॥ दृष्ट: कश्चिन्नर: स्वप्ने श्यामः कमललोचनः ॥१५॥ पीतवासा महाबाहुर्यो चित्तं हृदयंगमः
तमहंमृगयेकांतं पायपित्वाधरं मधु ॥१६॥ क्वापि यात: स्पृहयंतीं क्षिप्तामां वृजिनार्णवे चित्रलेखो
वाच व्यसनं तेपकर्षामि त्रिलोक्यां यदि भाव्यते ॥१७॥ तमानेष्ये नरं यस्ते मनोहर्त्ता तमादिश ॥ इत्युक्त्वा
देवगंधर्वसिद्धचारणपन्नगान् ॥१८॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च यथा लिखत् मनुजेषु च सा वृष्णी न
शूरमानकदुंदुभिं ॥१९॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मु
खी ह्रिया ॥२०॥ सोसाविसावितिप्राह स्मयमाना महीपते चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥२१॥
ययौ विहायसा राजन् द्वारकां कृष्णपालितां तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता ॥२२॥ गृहीत्वा शो
८४ णितपुरं सख्यै प्रियमदर्शयत् ॥ सा च तं सुन्दरवरं विलोक्य मुदितानना ॥२३॥ दुःप्रेक्ष्ये स्वगृहे पुंसां रेमे प्राद्युम्निना
समं ॥ परार्ध्यवास: स्रग्गंधधूपदीपासनादिभि: ॥२४॥ पानभोजनभक्ष्यैश्च वाक्यै: शुश्रूषणार्चित: ॥ गूढ:
कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥२५॥ नाहर्गणान्स बुबुधे ऊषयापहृतेंद्रियः ॥ तां तथा यदुवीरेण भुज्यमाना
हतव्रतां ॥२६॥ हेतुभिर्लक्षयांचक्रुरापीनां दुरवच्छदै: ॥ भटा आवेदयांचक्रू राजंस्ते दुहितुर्वयं ॥२७॥ विचेष्टितं ल

क्षयाम कन्याया: कुलदूषणं ॥ अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ कन्याया दूषणं पुंभिर्दुष्प्रेक्ष्याया न विद्महे ॥ ततः प्रव्यथितो बाणः

भा॰द॰उ॰ मेनं नारायणास्त्रं ४ शिखिना मयूरेण वाहनेन ५ तयोरनीकानि हतैर्नाथैर्येषां तानि ६ प्राणिरन्त्रमाणस्त्रियं मुखे

४० वमन्विति ॥ ७ ॥ ज्वरस्त्रेषोतुं मसमधावीदि ॥ ८ ॥ नारायणः शीतज्वरमसृजत ॥ ९ ॥ माहेश्वरः समाक्रंदन प्रभु ऐच ॥ १० ॥ श्री॰

मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितं बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः १४ स्कंदः प्रद्युम्नबाणौघैरर्द्य-
मानः समंततः असृग्विमुंचन्गात्रेभ्यः शिखिनापक्रमद्रणात् १५ कुंभांडः कूपकर्णश्च पेततुर्मुशलार्दितौ दुद्रु-
वुस्तदनीकानि हतनाथानि सर्वतः १६ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोत्यमर्षणः कृष्णमभ्यद्रवत्संख्ये रथी हि-
त्वैव सात्यकिं १७ धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै एकैकस्मिन् शरौ द्वौ द्वौ संदधे रणदुर्मदः १८ तानि
चिच्छेद भगवान् धनूंषि युगपद्धरिः सारथिं रथमश्वांश्च हत्वा शंखमपूरयत् १९ तन्माता कोटरा नाम नग्ना मुक्तशि-
रोरुहा पुरोवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया २० ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः बाणश्च तावद्विरथः
छिन्नधन्वाविशत्पुरं २१ विद्राविते भूतगणे ज्वरः महादेवप्रयुक्तो यो त्रिशिरास्त्रिपात् २२ अथ
नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरं माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ २३ माहेश्वरः समाक्रंदन् वैष्णवेन बला-
र्दितः २४ अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः २५ ॥

आत्मानं परमेशानं मत्वा तं मन्यमानः श्रीकृष्णं तापयितुं प्रवृत्तः स्वयमेव तप्तः सन् तं परमेश्वरं ज्ञात्वा तत्स्तुतिं नमस्करोति।

॥ नमामि त्वेति ॥ कृष्ण॰

४०

भिमुकर्षणितिनमे। यामबाणयाद्व्यसंगीस्मति अवेलणके अाणबाणबाहुभिदोहिः १ कर्मचयुद्धादि। रामकृष्णे नुवर्त्तिनइति नोपुरतो
निर्गतावित्यर्थः सर्वतोदिशमिस्यानंतरान्वयः। भज्यमानानिपुरोद्यानादीनिदृष्ट्वेकर्मद्वय: अट्टालाः प्राकारादुपरितनानामुन्न
तस्थानानि प्रासानिर्यपावाण:। सुतः स्कंदस्तत्सहितः प्रमथगणो दमने। त्पादार्थपृथे ३।

श्रीशुकउवाच अपश्यतांचानिरुद्धं तद्बंधूनांचभारत चत्वारोवार्षिकामासाव्यतीयुरनुशोचतां १ नारदात्तदुपाकर्ण्य
वार्त्तांबद्धस्यकर्मच प्रययुःशोणितपुरंवृष्णयःकृष्णदेवताः २ प्रद्युम्नोयुयुधानश्चगदःसांबोथसारणः नंदोपनं
दभद्राद्यारामकृष्णानुवर्तिनः ३ अक्षौहिणीभिर्द्वादशभिःसमेताःसर्वतोदिशं रुरुधुर्बाणनगरंसमंतात्सात्वत
र्षभाः ४ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं प्रेक्षमाणोरुषाविष्टस्तुल्यसैन्योभिनिर्ययौ ५ बाणार्थेभगवान्
रुद्रःससुतःप्रमथैर्वृतः आरुह्यनंदिवृषभंयुयुधेरामकृष्णयोः ६ आसीत्सुतुमुलंयुद्धमद्भुतंरोमहर्षणं कृष्णशं
करयोराजन्प्रद्युम्नगुहयोरपि ७ कुंभांडकूपकर्णाभ्यांबलेनसहसंयुगः सांबस्यबाणपुत्रेणबाणेनसहसात्यकेः
८ ब्रह्मादयःसुराधीशामुनयःसिद्धचारणाः गंधर्वाप्सरसोयक्षाविमानैर्द्रष्टुमागमन् ९ शंकरानुचरान्शौरिर्भू
१२ तप्रमथगुह्यकान् डाकिनीर्यातुधानांश्चवेतालान्सविनायकान् १० प्रेतमातृपिशाचांश्चकुष्मांडान्ब्रह्मराक्षसान्।
द्रावयामासतीक्ष्णाग्रैःशरैःशार्ङ्गधनुश्च्युतैः ११ पृथग्विधानिप्रायुंक्तपिनाक्यस्त्राणिशार्ङ्गिणे प्रत्यस्त्रैःशमयामा
सशार्ङ्गपाणिरविस्मितः १२ ब्रह्मास्त्रस्यचब्रह्मास्त्रंवायव्यस्यचपार्वतं आग्नेयस्यचपार्जन्यंनैजंपाशुपतस्यच १३
प्रसस्माणेबाहु। ब्रह्मास्त्रस्येति। श्री। श्रीकृष्णस्य रामस्य।। राधावल्लभोजयति।। श्री कृष्णस्य श्रीरामः।। जसदाय।।

जा०द०उ०

८१ अतो ऽज्ञानतस्त्वदीनं नैव मां तत्पुरस्तोत्याशयाप्युनाह तस्माहमिति नैतेजसा वत्सष्ठेन ह्रोलणमात्त्नो ऽग्रेणाणीत तरे
ण परसन्तापकस्य पुंसः एवं तापशान्तिरित्युक्तेः आह नावदिति सेवायां भवन्तानामनुचिन्तमिति भावः २८ त्रिशिरः
अनुग्रहपयानु महासापालकः सन् पुरवाविचर कासावाज्ञानामाह पश्यति नौ ऽआवयोः इमं सम्वादं यः स्मरेत तस्य त

41) तस्मो ऽहं तेजसा दुःसहेन मात्त्नो ऽग्रेणान्तुल्वणेन स्मरेण तावत्तापोदाहि नानं ह्यि मूलं नो सेवेरन् यावदाशा
नुवद्धाः २८ श्रीभगवानुवाच त्रिशिरस्ते प्रसन्नोहव्येतु ते मज्ज्वराद्भयम् यो नौ स्मरति सम्वादं तत्त्वं न भयं भवे तस्य
त् २९ इत्युक्तोच्युतमानम्य गतो माहेश्वरोज्वरः वाणस्तु रथमारुढः प्रागाद्योत्स्यन् जनार्दनम् ३० ततोबा
हुसहस्रेण नानायुधधरोऽसुरः मुमोच परमक्रुद्धो वाणांश्चक्रायुधे नृप ३१ तस्यास्यतोस्त्राण्यसकृच्चक्रेण क्षु
रनेमिना चिच्छेद भगवान्वाहून् शाखाइव वनस्पतेः ३२ वाहुषु छिद्यमानेषु वाणस्य भगवान्भवः भक्ता
नुकम्प्युपव्रज्य चक्रायुधमभाषत ३३ रुद्र उवाच त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये यं पश्यन्त्यमला
त्मान आकाशमिव केवलम् ३४

तत्त्वत्तो न भयं भवेत् त्वया भयं नोत्पादनीयमित्यर्थः २९ ३० ३१ ३२ ३३ भक्तरक्षार्थमेव रुद्रो भगवन्तं स्तौति त्वं हीति
आयमर्थः तां प्रजानां ऽग्रयं वुध्यत इति न चित्रम् मूलं त्वं वाङ्मये ब्रह्मण्यपि गूढं ब्रह्म अविद्या अविषयत्वात् कुतः पुरं शस्म
ज्योतिर्ज्योतिषामपि प्रकाशकत्वात् अविषय इत्यर्थः कथं तर्हि प्रतीतिरत आह यंमानमलात्मानोस्वतः प्रकाश इत्यर्थ ३४ ८१

नमामीति त्वां अनन्तशक्तिं नमामि कुतः परेशं ब्रह्मादीनां देवानां तत्र हेतुः सर्वात्मानं सर्वस्यात्मानं चेतयितारं तत्कुतः के-
वलं शुद्धं ज्ञप्तिमात्रं चिन्मात्रं स्वतन्त्रं देवम् सर्वचेतयितृत्वेन परमेश्वरत्वमुक्तम् किं च विश्वस्योत्पत्त्यादिहेतुत्वात् अपीत्याह विश्वो-
त्पत्तीति ननु एवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह यत्तद्ब्रह्मेति यत्तद्ब्रह्मेति श्रुतं आह ब्रह्मलिंगं ब्रह्मलक्षणावेदनलिंगं यस्य ग्रो-
तनश्चेति तत्कुतः प्रशान्तं सर्वविकारविरहितत्वात् नमाम्यहं नाम्यमिति भावः २५ किं च यावत्संसारिविशेषवस्तु तत्त्वं वयं प्रभ-
वामः त्वयि तु सर्वनिषेध्यातीतेन कस्यापि प्रभुत्वम् किं तु त्वमेव सर्वप्रभुरिति ज्ञाप्य मायया विहरएवं ज्ञेति का-

ज्वर उवाच नमामि त्वानन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्र-
प्र.२ ह्म ब्रह्मलिङ्गं प्रशान्तम् २५ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः तत्संघातो बीजरोहप्र-
वाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये २६ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि हंस्युन्मा-
र्गान्हिंसया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः २७

लइति काल: क्षोभकः कर्मनिमित्तं तस्य मदेव फलाभिमुखत्वम् अभिव्यक्तं दैवं स्वभावः तत्संस्कार जीवस्तद्वान् द्रव्यं भूतसूक्ष्माणि
क्षेत्रं प्रकृतिः प्राणः सूत्रं आत्मा अहंकारः विकाराः एकादशेन्द्रियाणि महाभूतानि चेति षोडशकः तत्संघातो देहः एतस्य च
बीजरोहवत्प्रवाहः रोहोऽङ्कुरः देहान्बीजरूपं कर्म ततोऽङ्कुररूपो देहः ततः पुनरेवमिति प्रवाहः एषा त्वन्माया तस्या
निषेधरूपो हि त्वम् तं त्वां निषेधावधिभूतं प्रपद्ये भजामीति २६ ननु देवकीतनयस्य मम कथमेवं तत्त्वं तत्राह नाना-
भावैरिति सर्वोपाधिनिर्मुक्तः एवं त्वं यथा लीलया स्वीकृतैर्मत्स्यादिभिः अवतारैः देवान् द्विजान् बिभर्षि पालयसि यद्वा लोकसेतून्
वर्णाश्रमधर्मान् तद्धर्मान् तद्वत्तु अहून्मार्गान् तदङ्गत्वेन उज्जान दैत्यादीन् हंसि संहरसि एवमेव तदापि तव जन्म भूमे

नमा

भा०द०उ०
४२ ननु यदि विमानविनाशे सर्वं विनश्यति भुवनानि सन्ति तर्हि कथमुक्तं त्वं हि ब्रह्मेति नहि ब्रह्मत्वे मम सजातीय
विजातीयभेदः संभवतीति अत आह त्वमिति एकः सजातीयरहितः कुतः आद्यपुरुषः पुरुषाणामवस्थात्रयव
तामाद्यः प्रकृतिप्रवर्तकः पुरुषः कुतः तुरीयः शुद्ध इत्यर्थः नन्वपि कुतः स्वदृक् स्वप्रकाशज्ञानरूपः शुद्धादेव उपाधि
योगाज्जीवा जायन्ते यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्व एवात्मानो व्युच्चरन्तीति श्रु
तेः अतः सजातीयभेदरहितः किंचाद्वितीयः विजातीयरहितोऽपि कुतो हेतुः सर्वस्य न तथास्य स्वयं हेतुरहितस्येति

त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीशः प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगु
णप्रसिद्ध्यै ३८ यथैव सूर्यः पिहितः स्वच्छायया छायां च रूपाणि च संचकास्ति एवं गुणेनापिहितो
गुणांस्त्वमात्मप्रदीपो गुणिनश्च भूमन् ३९

कथं तर्हि शरीरादिजीवभेदः प्रतीयते अत आह प्रतीयस इति सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ३८ तर्हि किं ब्रह्मैव
संसारी सुच्यते नाहं नहीति सदृष्टान्तमाह यथेति हे भूमन् स्वया छायया मेघलक्षणया परिछिन्नया अपिहितस्तदादितोऽपि सूर्यः छाया
मेघं च रूपाणि च मेघान्तरितान् घटादीन् एवं संचकास्ति प्रकाशयति एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेन ततोऽपिहितोऽपि
गुणान्सत्त्वादीनुपाधीन् गुणिनश्च तदुपहितान् जीवानपि च संचकास्ति आत्मप्रदीपः स्वप्रकाशः अतः सर्वसाक्षिणस्तव न संसार इत्यर्थः ३९

ऽग्रास्तां तावन्निर्गुणस्य नवन्तानंलीलया। भक्तिन स्वयं यो निराट् विग्रहः सोपि नन्तायतऽदुम्बर फलाम्।। अन्तर्बिर्निमशोकेरि वोदुम्ब
रफलमित्याश यनविराट् रूपेणस्तौति द्वाभ्यां। नाभिरिति। यस्य नभः आदयो नाभ्याद्यवयवाः स भगवान् लोककल्पः पुरुषस्त्व
मेवेत्यन्वयः नभो यस्य नाभिः। अग्निर्मुखम्। अम्बु रेतः। द्यौः शीर्षम्। आशा दिशः श्रुतिः श्रवणे। अंघ्रिः उर्वी अंघ्रिः। चन्द्रो मनः। अर्को
दृक्। अहं शिवः आत्मा। अहंकारः। समुद्रो जठरम्। इन्द्रः भुजा बाहुः। इन्द्रादयो लोकपाला बाहव इत्यर्थः ३५ ओषधयो रोमाणि

नाभिर्नभोऽग्निर्मुखमम्बुरेतो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः
३५ रोमाणि यस्यौषधयोम्बुवाहाः केशा विरिञ्चो धिषणा विसर्गः प्रजापतिर्हृदयं यस्य धर्मः स वै भगवान्पुरुषो
लोककल्पः ३६ तवावतारोयमकुण्ठधामन् धर्मस्य गुप्त्यै जगतो भवाय वयं च सर्वे भवतानुभाविता विभाव
यामो भुवनानि सप्त ३७

यश्चाब्दानि वृत्तिः अस्य हृतार्थो अम्बुवाहाः केशाः विरिञ्चो धिषणा बुद्धिः प्रजापतिर्विसर्गो मेढ्रं धर्मो हृदयं लोकैः कल्प
ते। अवलम्बते लोककल्पः ३६ ननु प्रादेशिकस्य कथं नभो नाभिरित्यादि इत्यत आह। हे अकुण्ठधामन् अप्रच्युतस्वरूप म कु.३
याया अभ्युदयाय न केवलमेतावत्। किंतु अस्मदनुग्रहार्थं अपीत्याह। वयं चेति सर्वे लोकपालास्त्वया पालिताः स
प्तापि भुवनानि पालयाम इति। ३७ श्रीगणेशाय नमः।।

४३ स्वयमलं किं मा याचस्य स्वतन्त्रस्याभीष्टमाह ऽयमिति दैत्यपतौ प्रह्लादे ४५ वैरोचनो बलिर्मद्भक्तः तत्सुतत्वादवध्य
इत्याः तावत् किंच प्रह्लादायेति ऽअन्वयो वंश्यः ४७ नोहि किमिति वेतदाह दर्पोपशमनायेति ४८ ऽअनुमतानीति

ऽअयंममेष्टोदयितोनुवर्त्ती मयाभयन्दत्तममुष्यदेव संपाद्यतांतद्भवतः प्रसादोयथाहितेदैत्यपतौप्रसादः ४५
श्रीभगवानुवाच यदात्थभगवंस्त्वन्नः करोमि किंप्रियंतव भवतायद्व्यवसितंतन्मेसाधुनुमोदितम् ४६ अ
वध्योयंममाप्येषवैरोचनसुतोऽसुरः प्रह्लादायवरोदत्तोनवध्योमेतवान्वयः ४७ दर्पोपशमनायास्यप्रवृक्णा
बाहवोमयासूदितंचबलंभूरियच्चभारायितंभुवः ४८ चत्वारोस्यभुजाः शिष्टाभविष्यत्यजरामरः पार्षदमु
ख्योभवतोनकुतश्चिद्भयोऽसुरः ४९ इतिलब्ध्वाभयंकृष्णंप्रणम्यशिरसाऽसुरः प्राद्युम्निंरथमारोप्यसवध्वो
समुपानयत् ५० अक्षौहिण्यापरिवृतंसुवासःसमलंकृतम् सपत्नीकंपुरस्कृत्यययौरुद्रानुमोदितः ५१ स्व
राजधानींसमलंकृतांध्वजैःसतोरणैरुक्षितमार्गचत्वराम् विवेशशंखानकदुन्दुभिस्वनैरभ्युद्यतःपौरसुहृ
द्द्विजातिभिः ५२ यएवंकृष्णविजयंशंकरेणचसंयुगम् संस्मरेत्प्रातरुत्थायनतस्यस्यात्पराजयः ५३

चत्वार इति ४९ सवध्वा उषया तु रुद्रानुमोदित इति मदभिप्रेतस्य बाणभुजभङ्गस्य कृतत्वात् ५१ पौरादिभिः ४३
अभ्युद्यतः अभिमुखमागत्य सत्कृतः ५२

43

किंतु मायाया मम स्यान्नेत्याह यतस्त्वत्कृतः संसृतिरित्याशयेनाह। यन्मायेनाह। यन्मायेति। पुत्रादिषु प्रसक्ता वृजिनार्णवे दुःख
सागरे उन्मज्जन्ति देवादियोनिषु। निमज्जन्ति स्थावरादिषु तदुक्तं मया च यवनीये विपर्ययश्च भवति। भूमन्वस्याब्रुत्वेपारिति
।४० एवं जीवस्य त्वदवस्थानि दृष्यदानां अभजन्तं निन्दति सार्धाभ्याम् देवेति दैवेन त्वया कर्माध्यक्षेण दत्तं नृदेहं लब्ध्वा।
पीति ४१ शोच्यत्वे हेतुः यस्त्वामिति विपर्यया: विपरीता: अनात्मा: अप्रियानीश्वरा इन्द्रियार्था: पुत्रादयस्तदर्थम् ४२

यन्मायया मोहितधियः पुत्रदारगृहादिषु उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ४० देवदत्तमिमं लब्ध्वा
नृलोकमजितेन्द्रियः यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ४१ यस्त्वां विसृजते मर्त्य आत्मानं प्रियमी
श्वरम् विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ४२ अहं ब्रह्मा च विबुधा मुनयश्चामलाशयाः स
र्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ४३ तं त्वां जगत्स्थित्युदयान्तहेतुं समं प्रशान्तं सुहृदात्मदैव
म अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवम् ४४

अहमन्ये च शुद्धमनसस्त्वदेव भक्ता इत्याह ४३ भवतो भजनीयत्वे हेतून्वदन्तद्भक्तिं प्रार्थयते। तन्त्वेति। समत्वे हेतुः
प्रशान्तमिति। सुसेव्यत्वमाह। सुहृदात्मदैवं सुहृद्बुद्धिप्रवर्तकत्वात् आत्मानं च सर्वात्मकत्वात् एवंभूतं दैवमाराध्यं त्वां
न चान्यो भजनीयोऽस्तीत्याह अनन्यं एकं समानजातीयरहितम् अतः कुतः जगतामात्मानां च केतनमधिष्ठानं ४४

भा०द०उ०

४४ यत्र पादद्वमंयोग्यं ८ यदि तेकर्णमस्पृशामिति अप्रसन्देहे सन्देहवचनः यदि वेदाः प्रमाणं स्युरितिवत् कर्णश्चे
न्नूनं प्राप्नुयामित्यर्थः १० किंच किंत्विति सर्वेषां भूतानामात्मनोबुद्धेः साक्षिणस्ते अविदितं किं नु न किंचित्
११ अनव्रतेभ्यः सत्यवादिभ्यः न पत्साक्षिणः प्रख्यातो यथनेब्रह्मणि वदान्याः अनुदाराः अध्यापनशीलाः स्वतन्त्र

44

दृष्टाभिमाम्वाकतमेनकर्मणा संप्रापितोह्यनर्हः सुभद्र आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे
नः क्षममत्र वक्तुम् ८ श्रीशुकउवाच इतिस्मराजा संपृष्टः कृष्णेनानन्तमूर्तिना माधवंप्रणिप
त्याह किरीटेनार्कवर्चसा ९ नृगउवाच नृगोनाम नरेन्द्रोहमिक्ष्वाकुतनयः प्रभो दानिष्वाख्यायमा
नेषु यदि ते कर्णमस्पृशम् १० किंनुतेऽविदितं नाथ सर्वभूतात्मसाक्षिणः कालेनाव्याहतदृशो व
क्ष्येथापि तवाज्ञया ११ यावत्यः सिकता भूमेर्यावत्यो दिवि तारकाः यावत्यो वर्षधाराश्च तावतीरद
श्लो०४ दं स्मगाः १२ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृङ्गीः न्यायार्जिता रूप्यखु
राः सवत्सा दुकूलमालाभरणा ददावहम् १३ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुम्बेभ्य ऋतव्रते
भ्यः वामां सिरत्नान्यपि दानन्याभिष्टं च यज्ञैश्चरितं च पूर्तम् १५ कस्यचिद्द्विजमुख्यस्य भ्रष्टा
गौर्मम गोधने सम्पृक्ताविदुषा सा च मया दत्ता द्विजातये १६

छ०स्म०

न्नयवतेभ्यः १४ पूर्त्तं वापीकूपादि चरितं कृतवान् १५ एवं वर्तमानस्य मम संकटं किंचिदापन्नमित्याह कस्यचि ४४
दिति द्विजमुख्यस्य प्रतिग्रहेनिबद्धस्य संपृक्ता मिलिता अविदुषा ब्राह्मणस्येयमित्यजानता १६ १७ ग्रा

इति दशमे त्रिषष्टितमः ६३ चतुःषष्टितमे कृकलासान्नृगं पापान्मोचयन् ब्रह्मस्वहारिदोषोऽस्य राज्ञोऽहमानांशोऽन्न
यत् १ विभूतिभागपभोगादिमदोन्नद्धमनोरथान् अन्वशास्यदूत्कृकलासान्नृगोद्धारप्रसङ्गतः २।।१।। पिपासितास्त

इति श्रीभागवते महापुराणे दशमस्कन्धेऽनिरुद्धानयने त्रिषष्टितमोऽध्यायः ६३ श्रीशुक उवाच एक
६२ दोपवनं राजन् जग्मुर्यदुकुमारकाः विहर्तुं साम्बप्रद्युम्नचारुभानुगदादयः १ विक्रीडितावचिरन्तत्र विचिन्वन्तः
।।६३ पिपासिताः जलं निरुदके कूपे ददृशुः सत्वमद्भुतम् २ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः तस्य चो
द्धरणे यत्नं चक्रुस्ते कृपयान्विताः ३ चर्मजैस्तान्तवैः पाशैर्बद्ध्वा पतितमर्भकाः नाशक्नुवन्समुद्
धर्तुं कृष्णायाचख्युरुत्सुकाः ४ तत्रागत्यारविन्दाक्षो भगवान्विश्वभावनः वीक्ष्योज्जहार वामेन तं करेण
स लीलया ५ स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपम् संतप्तचामीकरचारुवर्णः स्व
र्ग्यद्भुतालंकरणाम्बरस्रक् ६ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुन्दः कस्त्वं महा
भाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनम् ७

पिपासिताः जलं विचिन्वन्तः सत्वं जीवम् २ तं च कृकलासं वीक्ष्य चर्मभिः चर्ममयैः पाशैः तान्तवैः तन्तुम
यैश्च ४ संतप्तचामीकरं सुवर्णं तद्वद्वर्णो यस्य सः अद्भुतान्यलंकरणाम्बरस्रजो यस्य सः स्वर्गी देवो बभू
वेति ६।७

भा०द०उ०
४५

उद्दिश्य गतिर्विहार्या सम्बोधयन् अनुज्ञापयति अनुजानीहीति देवलोकेपि यत्र तत्र मनुष्यात्मनो मम सान्निध्यं प्रार्थयते यत्र क्वापि
ति ॥ त्वत्पदमास्पदं विषयो यस्य तथाभूतं भूयादिति २८ भास्वन्तमाह नम इति सर्वभावाय सर्वस्य भावो जन्म येन तस्मै ब्रह्मणे
कारणत्वेपि विकाराय कुतः अनन्तशक्तये अनन्ता मायाख्या शक्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयाय स्वपादानाच्च मुक्तेम
मां कृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तम् कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण
इत्यभिधीयते इति स्मृतेः किंच योगानां इष्टापूर्तादिकर्मणां पतये फलदात्रे अयं भावः एवंभूतं त्वा विहाय गत्वा मम निन्दा तदपि
गतिरिष्टापूर्तादिकर्मफलभोगाय २९ मनागीषदपि भुक्तं सत् अग्नेः अग्निसदृशस्यापि तेजीयसः अपि तेन जग्धिनो यदि दुर्जरं किमुत

अनुजानीहि मां कृष्ण यान्तं देवगतिं विभो । यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदम् २८ नमस्ते सर्वभावाय ब्र
ह्मणेऽनन्तशक्तये । कृष्णाय वासुदेवाय योगानां पतये नमः २९ श्रीशुक उवाच इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्व
मौलिना । अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां ३० कृष्णः परिजनं प्राह भगवान्देवकीसुतः । ब्रह्मण्यदेवो धर्मा
त्मा राजन्याननुशिक्षयन् ३१ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि । तेजीयसोपि किमुत राज्ञामीश्वरमानिनाम् ३२
नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया । ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ३३ हिनस्ति विषमत्तारं वह्नि
रद्भिः प्रशाम्यति । कुलं समूलं दहति ब्रह्मस्वारणिपावकः ३४ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हन्ति त्रिपूरुषम् । प्रसह्य
तु बलाद्भुक्तं दश पूर्वान्दशापरान् ३५ राजानो राजलक्ष्म्यान्धा नात्मपातं विचक्षते । निरयं येऽभिमन्यन्ते ब्रह्मस्वं साधु
॥ बालिशाः ३६ ॥

किंच विषादपि घोरमित्याह । हिनस्तीति संसर्गिणं संसर्गमात्रेण मारकत्वादग्नितुल्यतास्यात् । तदपि नेत्याह । वह्निरिति शपिचस
मूलमिति वह्निर्मूलान्यवशेषयति । ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं तदपि समूलमिति ३४ ज्ञातमपि यावद
ननुज्ञातं त्रिपूरुषं कुलं स्वयं पुत्रं पौत्रं च । प्रसह्य हठात् बलात् राज्ञा आक्रम्य यदि ३५ ये ब्रह्मस्वमभिमन्यन्ते इच्छन्ति ते निरयमेव

कृष्ण०
४५

प्रतिग्राहितेणक्रम दत्तेति स्वामिनो क्रमम् ॥ अपहर्त्तेति ॥ अनवक्रम: व्याकुलो नर्त्तमित्यर्थ: १८ तदा उभावपि प्रेयसे कमनुनीतो
प्रार्थितौ कथं तदाह गवामिति सार्द्धेन १९ २० अपर: प्रतिग्राही दत्ताग्र हीपल ततः इत्ययोक्रमम् ॥ अनदपिगवामयुत
पदिनदपीमांविहायनेच्छामि त्युक्त ॥ गात्यस्कापियाविस्मर्यी २१ एतस्मिन्नन्नन्तरे इति ॥ इत: पश्चात् पापाभावान्नेनुमस
मर्थेरिति भाव: २२ कृता है इत्येकं पदं ॥ अयवा परब्रह्मभमिति । नान्नमिति यमस्य स्वस्य ना वाक्यं परस्य परपामि २२

तानीयमानो तत्स्वामी इष्टोना च ममेति तम ममेति प्रतिग्रहमाह नो गोमेदत्ता वा नीति २७ विप्रो विवदमानौ मामृच
तु: स्वार्थसाधको भवप्रलापहर्त्तेति तत्कृत्वा मे नवक्रम: २८ अनुनीतावुभौ विप्रौ धर्मञ्ज छृगतेन वै गवां लक्षं प्रक
ष्टानां दास्याम्येषां प्रदीयताम् २९ भवंतावनुगृह्णन्तौ नाकिंकरस्याविजानत: सम्भ्रमं मां क्षिप्तं पतंतं निरये शु
चौ ३० नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्युपाक्रमत् नान्यं गवामप्ययुतमिच्छामीत्यपरोऽप्ययौ ३१ एतस्मिन्नन्त
रे याम्यैर्दूतैर्नीतो यमक्षयम् यमेन पृष्टस्तत्राहं देवदेव जगत्पते ३२ पूर्वं त्वमशुभं भुंक्ष्व उताहो नृप ते शुभम्
नांतं दानस्य धर्मस्य पश्ये लोकस्य भास्वत: ३३ पूर्वं देवाशुभं भुंज इति प्राह पतेति स: ॥ तावदद्राक्षमात्मानं कृक
लासं पतन्प्रभो ३४ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिन: ३५
स त्वं कथं मम विभो ऽक्षिपथ: परात्मा योगेश्वरै: श्रुतिदृशामलहृद्विभाव्य: साक्षादधोक्षज उरुव्यसनान्धबुद्धे: स्या
न्मेऽनुदृश्य इह यस्य भवापवर्ग: ३६ देवदेव जगन्नाथ गोविंद पुरुषोत्तम नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ३७

हे देव मम पूर्वमशुभं भुंज इति मयोक्तं सयम: पतेति प्राह ३४ दुर्घरेन मी ... दर्शनेन विस्मितं सन्त ॥ आत्मनो भाग्यमभिनन्दति स त्व
मिति हे विभो स त्वं मम ऽक्षिपथ: लोचनगोचर: सन् कथं स्यात् ... त्यर्थ: किं नत्वा ... नाह । पर: परमात्मा ... योगे
श्वरैरपि श्रुतिदृशा उपनिषद्दृष्ट्या ॥ अमलो हृदि विभाव्य: चिन्त्य: ... इति: अधोक्षज: ॥ ... ते ... नान्नतत्त्वमध: ॥ भवो गवमस्या

भा०द०उ० [illegible]

४६ रामस्य संदर्शने आहूताः सादराः ६ ताः तं दमनेयुष्माभिः प्रतिबन्धः किं न कृतः तदा क्व विरवा मादि निचेत् ननु वि
श्वासः किमिति कृतः नत्राह कथं ति ति० वक्रवृत्त्यानानाविधानि वाक्यानि नत्रान्या ऊचुः कथं नु गच्छन्तो म
० प्रन्या ऊचुः गच्छन्निवाशी नि चित्रकथं स्यात्तत्र कथं तत्र कोविदस्य किं च सुन्दरं स्मितं यस्मिन् तेनावलोकेन नून्तृष्ठ
स्तनः सुमिनोयः स्मरत्तेनातुराः ११ अपरा ऊचुः किन्नु इति० कालस्त्वावन्नस्य चास्माकं च यात्येव किन्नु तस्य सुखेन

काचन्नो बान्धवा राम सर्वे कुशलमासते कच्चित्स्मरति नो रामः कृष्णः सदा मुनान्विताः ७ दिष्ट्या कंसो हतः पापो दिष्ट्या
मुक्ताः सुहृज्जनाः निहत्य नार्कोत्तयिपञ्च दिष्ट्या दुर्गो समाश्रिताः ८ गोप्याः सनम्यः पप्रच्छू रामसंदर्शनादृताः
कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ९ कच्चित्स्मरति वा बन्धून् पितरं मातरं च सः अप्येवास्मरते स्माक
मनुसेवां महाभुजः १० मातरं पितरं भ्रातॄन् पतीन् सुतान्स्वसॄरपि यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान् प्रभो ११
ताः नः सद्यः परित्यज्य गतः संछिन्नसौहृदः कथं नु ताहृशं स्त्रीभिर्न श्रद्धीयेत भाषितम् १२ कथं नु गृह्णन्त्यनवस्थितात्
मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः गृह्णन्ति वै चित्रकथस्य सुन्दरस्मितावलोकोच्छ्वसितस्मरातुराः १३ किं न
स्तत्कथया गोप्यः कथाः कथयत अपराः यात्यस्माभिर्विना कालो यदि तस्य तथैव नः १४ इति प्रहसितं शौरे
र्जल्पितं चारुवीक्षितम् गतिं प्रेमपरिष्वङ्गं स्मरन्त्यो रुरुदुः स्त्रियः १५ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयं
गमैः सान्त्वयामास भगवान्नानानुनयकोविदः १६ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च रामः क्षपा
सु भगवान् गोपीनां रतिमावहन् १७ पूर्णचन्द्रकलामृष्टे कौमुदीगन्धवायुना यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः १८

स्माकं नु दुःखेनेत्यन्ताबानेच विशेषाइति ध्वनितम् १४ १५ नानाविधेष्वनुनयेषु कोविदः ॥१६॥ मधुं चैत्रं माधवं वैशाखम्

२ ग्रहं ति यावतः पांसवः कुंदत्ता मस्तु विंदवः । विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ३७ राजानो राजकुल्याश्च तावतोऽब्दान्निरंकु-
शाः । कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ३८ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः । षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ३९

अपि च गरस्येतीति ३७।३८।३९ ब्रह्मकादय ४०।४१ प्रणमे नमामि ४२ न केवलं विवादादिनी किंतु प्रत्यहानि
त्याह ब्राह्मणार्थ इति ४३।४४ इति दशमे चतुःषष्टितमः ६४ पंचषष्टितमे राम एको गोकुलमागतः रममाणः गोपी

न मे ब्रह्मधनं भूयाद्यद्गृध्वाल्पायुषो नराः । पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ४० विप्रं कृतागसमपि नैव
द्रुह्यत मामकाः । घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ४१ यथाहं प्रणमे विप्राननुकालं समाहितः तथा न
मत यूयं च योऽन्यथा मे स दंडभाक् ४२ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः । अजानंतमपि ह्येनं नृ
गं ब्राह्मणगौरिव ४३ एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः । पावनः सर्वलोकानां विवेश निजमं
दिरम् ४४ इति श्रीभागवते महापुराणे दशमस्कंधे नृगोपाख्यानं चतुःषष्टितमोऽध्यायः ६४ श्री
शुक उवाच बलभद्रः कुरुश्रेष्ठ भगवान्रथमास्थितः सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलम् १
परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च रामोऽभिवाद्य पितरावाशीर्भिरभिनंदितः २ चिरं नः पाहि दाशा
र्ह सानुजो जगदीश्वर इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ३ गोपवृद्धांश्च विधिवद्यविष्ठैरभि
वंदितः यथावयो यथासख्यं यथासंबंधमात्मनः ४ समुपेत्याथ गोपालान्हास्यहस्तग्रहादिभिः वि
श्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ५ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा कृष्णे कमलपत्रा क्षे

मेः कालिंद्याकर्षणं मदात् १ रामस्य चरितं चित्रं कालिंद्याकर्षणादिकम् पौण्ड्रकान्तादि कृष्णस्य प्रयुक्त
मतः परमं आशीर्भिरभिनंदितो बभूव २ चिरमिति ३ गोपवृद्धांश्च विधिवदभिवन्द्य यविष्ठैरभिवन्दितो ब
भूवेत्यर्थः अथ ... इति ५ ते सर्वे स्वेषु यादवेषु तं रामं अनामयमारोग्यं पप्रच्छुः ते च तेन पृष्टा इति कृष्णे
१८

४७ चन्दनादिभिरालिप्तः ३१ एकेवत्यैकेवनिशायाययामाधुर्यैर्विलासैः ३१ ३२ ३३ इति दशमे पंचषष्टितमः ६५ पद्य
केषाष्टितमे काशीगत्वाऽहमेव एड केहारिः तन्मित्रं च जनितो बन्तुं सुदः त्रिणवधादिकैः १ प्रस्तोभितः कृत्याप्रोत्साहितः

वसीत्वा वाससी नीले मालामामुच्य कांचनीम् रेजे स्वलंकृतो लिप्तो माहेन्द्र इव वारणः ३१ अद्यापि दृश्यते रा
जन्यमुनाकृष्टवर्त्मना बलस्यानन्तवीर्यस्य वीर्यम्सूचयतीव हि ३२ एवं सर्वा निशा याता एकेव रमतो
व्रजे रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ३३ इति श्रीभागवते महापुराणे दशमस्कन्धे बलदेव
विजये यमुनाकर्षणं नाम पंचषष्टितमोऽध्यायः ६५ श्रीशुक उवाच नन्दव्रजं गते रामे करूषाधिपति
र्नृप वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् १ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः इति प्रस्तो
भितो बालैर्मेन आत्मानमच्युतम् २ दूतं च प्राहिणोन्मन्दः कृष्णायाव्यक्तवर्त्मने द्वारकायां यथा बालो
नृपो बालकृतोऽबुधः ३ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुम् कृष्णं कमलपत्राक्षं राजसन्देशम
ब्रवीत् ४ वासुदेवोऽवतीर्णोऽहमेक एव न चापरः भूतानामनुकम्पार्थं त्वं तु मिथ्याभिधां त्यज ५ या
नि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवम् ६ श्रीशुक उवा
च कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ७ उवाच दू
तं भगवान्परिहासकथामनु उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ८ ॥श्रीरामजीसहायः ॥ हरिः

वालैरज्ञैः बालकृतो नृपः बालैर्नृपत्वेन कृतोऽयथार्थपरिकल्पितः ३ हे मूढ ७ उत्स्रक्ष्ये ·यैः प्रक्षेप्स्यामि यैः सह त्वम् ८
देवकस्य सैन्यस्य सर्वान्तस्यैः यन्नाथैः सुनिभैः सुदर्शनादिभिः त्वमेवं श्लाघसे तानि उत्स्रक्ष्ये त्यक्ष्यामि त्वयि ८ ४७

कौमुदीशब्देनचन्द्रिकायांतानिकुमुदानिलक्ष्यन्ते कुमुदगन्धवायुनेत्यर्थः १९ वारुणीसुधयासहोत्पन्नामदिरा:
क्षीबोमत्तः २१ स्वेदएवप्रालेयंहिमंतेनभूषितं २२ मत्तोयमित्यनादृत्यानागताम् आपगांनदीम् २३ आहूताआग
हूता: यद्यस्मान्नागच्छसि २४ तस्मात्तेनेष्येगमिष्यामिच २५ चकिताकंपिता एकांशेनशेषरूपेण २६ २७ विजगा
हे अवगाहंचक्रवान् २८ उत्तीर्णायैनिर्गतायै आसिताम्बरादीनिकान्तिर्ददौ कान्तिर्लक्ष्मीः यथोक्तंवैष्णवे:

वरुणप्रेषितादेवीवारुणीवृक्षकोटरात् पतन्तीतद्वनंसर्वंस्वगंधेनाध्यवासयत् १९ तंगन्धंमधुधारायावायुनो
पहृतंबलः आघ्रायोपगतस्तत्रललनाभिःसमंपपौ २० उपगीयमानचरितोवनिताभिर्हलायुधः वनेषुव्य
चरत्क्षीबोमदविह्वललोचनः २१ स्रग्व्येककुण्डलोमत्तोवैजयन्त्याचमालया बिभ्रत्स्मितमुखांभोजंस्वेदप्रा
लेयभूषितम् २२ सआजुहावयमुनांजलक्रीडार्थमीश्वरः निजंवाक्यमनादृत्यमत्तइत्यापगांबलः २३ अ
नागतांहलाग्रेणकुपितोविचकर्षह पापेत्वंमामवज्ञाययन्नायासिमयाहुता २४ नेष्येत्वांलांगलाग्रेणश
४ मा तधाकामचारिणीम् २५ एवंनिर्भर्त्सिताभीतायमुनायदुनन्दनम् उवाचचकितावाचंपतितापादयोर्नृप २६
रामराममहाबाहोनजानेतवविक्रमम् यस्यैकांशेनविधृताजगतीजगतःपते २७ परंभगवतोभावं
भगवन्मामजानतीम् मोक्तुमर्हसिविश्वात्मन्प्रपन्नांभक्तवत्सल २८ ततोव्यमुंचद्यमुनांयाचितोभगवान्ब
लः विजगाहजलंस्त्रीभिःकरेणुभिरिवेभराट् २९ कामंविहृत्यसलिलादुत्तीर्णायासिताम्बरे भूषणानि

वरुणप्रहितांचास्मैमालामम्लानपंकजाम् समुद्राभेतथावस्त्रेनीलेलक्ष्मीरयच्छत इति हरिवंशे च बलंप्रतिलक्ष्मी
वाक्यम् जानामित्वपमेयंचैकंकुण्डलंवज्रभूषितम् आदित्यश्चपद्मास्यंदिव्यंश्रवणभूषणम् देवेभ्यंप्रतिगृह्णी

महार्हाणिददौकान्तिःशुभांस्रजम् ३०
स्वपेरालिभूषणोत्क्रियामित्यादि २९ वासित्वापरिधाय आमु
च्यकण्ठेनिधाय ३०

भा०द०पु०
४८

प्रथमांकिमिदमिति पश्चाद्वक्त्रमिति· किनावकस्यवेति· संशिशिरे· संशयं कृतवन्त इति २६ संस्थाविधिं उत्तरक्रिया
म् अपचितिं निःकृतिम् २७ आत्मनाभिसन्धायबुद्ध्यावधस्यसुदक्षिणः अनुदारः २८ अनुदारः वरमदात् व
लोप्सेत्युक्तेनागानिरपर्थः २९ आहिजं च्वा विजमिवं स्वनियोगकारिणम् यत्तस्यदक्षिणाग्निमितिस्थानि: ३० अ

तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः ॥ न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २२ एवं मत्सरिणं हत्वा
पौण्ड्रकं ससखं हरिः द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥ स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबन्धनः बि
भ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतितमालोक्य राजद्वारे सकुण्डलम् किमिदं कस्य वा वक्त्रमिति
संशिशिरे जनाः ॥ २५ ॥ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबान्धवाः पौराश्च हा हता राजन्नाथ नाथेति प्रा
रुदन् ॥ २६ ॥ सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥ २७ ॥ इत्या
त्मनाभिसंधाय सोपाध्यायो महेश्वरम् सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २८ ॥ प्रीतोऽविमुक्ते भगवांस्त
स्मै वरमदाद्विभुः ॥ पितृहन्तृवधोपायं स वव्रे वरमीप्सितम् २९ दक्षिणाग्निं परिचर ब्राह्मणैः समम् ऋत्विजम् अ
भिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ ३० ॥ साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः ॥ इत्यादिष्टस्तथा चक्रे
कृष्णायाभिचरन्व्रती ३१ ततोऽग्निरुत्थितः कुण्डान्मूर्तिमानतिभीषणः ॥ तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलो
चनः ॥ ३२ ॥ दंष्ट्रोग्रभ्रुकुटीदण्डकठोरास्यः स्वजिह्वया ॥ आलिहन्सृक्कणी नग्नो विधुन्वंस्त्रिशिखं ज्वलन् ॥ ३३

ब्रह्मण्ये प्रयोजित इति अब्रह्मण्ये प्रयोजितो विपरीतो भविष्यतीति सूचितम् अभिचरन् अभिचारं कुर्वन् व्रती गृहीतनियमः
३१ मप्ततान्त्राभिवशिखा श्मश्रूणि च यस्य सः अङ्गारोद्गारिणी लोचने यस्य सः ३२ दंष्ट्राभिरुग्रे भ्रु

कुटी दण्डेभ्य कठोरास्य कठोरमास्यं यस्य सः त्रिशिखं त्रिशूलम् ३३

कृष्ण
४८

मांसरणमेहि त्वमद्यो नरं मुख्यमिति वदः कंकादिलनपाद्याविशेषाः तत्र तदा श्रुत्वा रणमाश्रयोमविनाशि ९ कामीमिति
पौण्ड्रकस्यापि तदाभित्रपुरेवस्थानात् पार्ष्णिग्राहः एकलव्यकः १२ गरुडः कार्त्तिमोदानेपस्मृतम् अमल्योऽनवधिमि।
ख
मुकुन्दपिधायास्कंकाश्च वैदर्भिनः शीघ्रमासहजावनमाविनाशारणं च्छुना ९ इति दूतस्तदा द्वौ पंस्वामिने सर्वं
माहरत् श्रुत्वापि स्यमास्थायकाशी भूपजगामह १० पौण्ड्रकोपि तदुद्योगमुपलभ्य महारथः अक्षौहिणीभ्यां
संयुक्तो निष्क्रान्तः पुरात्तुतम् ११ तस्य काशीपतिर्भिन्नर्णा अक्षौहिणीन्नियान्नृप अक्षौहिणीभिस्तिसृभिरवधप्य
पौण्ड्रकहरिः १२ शंखचक्रासिगदाशार्ङ्ग श्रीवत्साद्युपलक्षितम् बिभ्राणं कौस्तुभमणिं वनमाला विभूषितम्
१३ कौशेयवाससी पीते वसानं गरुडध्वजं अमूल्यकल्पाभरणं स्फुरन्मकरकुण्डलम् १४ दृष्ट्वा तमात्मनस्तु
ल्यवेषं कृत्रिममास्थितम् यथानटं रङ्गगतं विजहास भृशं हरिः १५ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोम
रैः असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिम् १६ कृष्णस्तु तत् पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्ति
मत् गदासिचक्रेषुभिरार्दयद्भृशं यथा युगान्ते हुतभुक् पृथक्प्रजाः १७ आयोधनं तद्रथवाजिकुञ्जरद्विपत्ख
रोष्ट्रैररिणावखण्डितैः बभौ चितं मोदवहं मनस्विनाम् आक्रीडनं भूतपतेरिवोल्बणम् १८ अथाह पौण्ड्रकं शौरि
र्भो भो पौण्ड्रक यद्भवान् दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते १९ त्याजयिष्येऽभिधानं मे यत्त्वयाऽज्ञ मृषा
धृतं व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् २० इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् शिरो ऽवृश्च

लेन भरणे पश्यतम् १४ १५ १६ गजस्यन्दनादि चतुरंगबलमर्दितवान् पृथक्प्रजाः चतुर्विधं भूतग्राम यथा युगान्तानिल
रिति १७ आयोधनं रणस्थानं अरिणा चक्रेण चितम् आक्रीडं आक्रीडनमिव कल्पान्ते रुद्रस्य क्रीडास्थान

श्री ८८

भा०द०उ०
४२ कालिंदीविदारणानंतरं रामचरितं द्विविदवधादि संमतमप्यनुक्तं तत्र वक्ष्यमाणे भाविलेनैणें कवधादि निरूप्य दर्शनां तदेवं पृष्टो
ऽनिलमर्याहमित्यादिना रामचरितं श्रवणेच्छया मद्भुतकर्मत्वे हेतुः। तत्र चानंतत्वं तत्रापि अप्रमेयत्वमिति १ नरकस्य सखेति।
हीनगणवैरकारणं सुग्रीवसचिवेति। तस्य भ्रातृबलमैन्दस्य भ्रातेति रामायणे प्रसिद्धत्वेन वीर्येति विक्रममुक्तमिति २ सख्युः नर
कस्यापचितिं शत्रुप्रतीकारं राष्ट्रस्य विप्लवो यथा भवति तथा पुरादीनदहदिति ३ किंच क्वचिदिति। कदाचित्सद्धैतेति मित्रहा
सखिहन्ता ४ तस्य सख्युः प्रस्थलम्। बाहुभ्यामुत्क्षिप्य वेलायां कूले च तमानान्देशान्मज्जयामासेति ५ आश्रमस्थान्॥

भूयोहंश्रोतुमिच्छामि रामस्याद्भुतकर्मणः। अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः १ श्रीशुक उवाच नरकस्य सखा
कश्चिद्द्विविदो नाम वानरः। सुग्रीवसचिवः सोथ भ्राता मैंदस्य वीर्यवान् २ सख्युः सोपचितिं कुर्वन्वानरो राष्ट्रवि
प्लवम्। पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ३ क्वचित्स शैलानुत्पाट्य तैर्देशान्समचूर्णयत्। आनर्तान्सुतरामेव
यत्रास्ते मित्रहा हरिः ४ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम्। देशान्नागायुतप्राणो वेलाकूले न्यमज्जयत् ५
आश्रमानृषिमुख्यानां कृत्वा भग्नवनस्पतीन्। अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ६ पुरुषान्योषितो दृप्तः द:
क्ष्माभृद्द्रोणीगुहासु सः। निक्षिप्य चाप्यधाच्छैलैः पेशस्कारीव कीटकम् ७ एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रि
यः। श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ८ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनम्। सुदर्शनीयसर्वांगं ललना
यूथमध्यगम् ९ गायंतं वारुणीं पीत्वा मदविह्वललोचनम्। विभ्राजमानं वपुषा प्रभिन्नमिव वारणम् १०

१वनस्पतीन् भंक्त्वा॥ आहवनीयादग्नीन् मूत्रादिकृतवानित्यर्थः ६ अयमर्थात्पिदधे पेशस्कारी भ्रमरः ७।८।९।१० क्रम०
॥ विभ्रमत्त २० ॥ ४२

दिशः प्रदहन् ३४ ३५ त्राहि त्राहीत्याहुरिति शेषः ३६ अहमवितास्मि रक्षिष्यामीति ३७ ३८ रोदसी प्रकाशयदिति शेषः अम
यदा ॰स्वतेजसा खादीन् प्रतिजाज्वल्यमानं ॰अत्यर्थं प्रकाशमानमित्यर्थः ॰आर्दयत् ॰अपीडयत् ३९ ॰आर्दितः ॰निवृत्तः

द्वा

पद्भ्यां तालप्रमाणाभ्यां कम्पयन्नवनीतलम् सोऽभ्यधावद्वृतो भूतैर्द्वारकां प्रदहन् दिशः ३४ तमाभिचारदहनमायान्तं द्वार
कौकसः विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ३५ अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः त्राहि त्रा
हि त्रिलोकेश वह्नेः प्रदहतः पुरं ३६ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसम् शरण्यः संप्रहस्या
ह माभैष्टेत्यवितास्म्यहम् ३७ सर्वस्यान्तर्बहिःसाक्षी कृत्यां माहेश्वरीं प्रभुः विज्ञाय तद्विघातार्थं पार्श्वस्थं
चक्रमादिशत् ३८ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभम् स्वतेजसा खं ककुभोऽथ
रोदसी चक्रं मुकुन्दास्त्रमथाग्निमार्दयत् ३९ कृत्यानलः प्रतिहतः स रथाङ्गपाणेरस्त्रौजसा स नृप भग्न
मुखो निवृत्तः वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः ४० चक्रं च विष्णो
स्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणाम् सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशाला
म् ४१ दग्ध्वा वाराणसीं सर्वां विष्णोश्चक्रं सुदर्शनम् भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ४२ य ए
नं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ४३ इति श्रीभागवते महा
पुराणे दशमस्कन्धे काशीराजपौण्ड्रकवधः षट्षष्टितमोऽध्यायः ६६ राजोवाच

नवांसदाः ६ कृत्यानल इति महति निर्भङ्गे निवर्तमाने अभिचरयितैर्नैनं अभिचारः कृत्यानलः ४० अट्टादि
सहिताम् ॰अट्टा मञ्चाः ४१ ४२ ४३ इति दशमे षट्षष्टितमः ६६ सप्तषष्टितमे रामो गिरौ रैवतके मदात् ॥

स्वैरं युवतिभिः क्रीडन्नवधीद्द्विविदं खलम् १

मा०८६०७०

५० टंकाः सतोयविवृताणि नतसहितः २८ नगलोत्व्यतिकं लोकयावहतीति यावत् २९ २८ इति दशमे सप्तषष्टितमोऽध्या
यः ६७ अष्टषष्टितमे साम्बो निबद्धः कौरवैर्युधि तद्धेतोर्बलरामेण गजाह्वयविकर्षणम् १ साम्बचरित्रान्तरं निरूपयन्नाह

वक्षे पतेन पतता स टंकः स वनस्पतिः पर्वतः कुरुशार्दूल वायुना नौरिवाम्भसि २६ जयशब्दो नमःशब्दः साधुसाध्विति
चाम्बरे सुरसिद्धमुनीन्द्राणामासीत्कुसुमवर्षिणाम् २७ एवं निहत्य द्विविदं जगद्व्यतिकरावहम् संस्तूयमानो भ
गवान् जनैः स्वपुरमाविशत् २८ इति श्रीभागवते महापुराणे दशमस्कन्धे द्विविदवधो नाम सप्तषष्टितमोऽध्यायः
६७ श्रीशुक उवाच दुर्योधनसुतां राजन् लक्ष्मणां समितिंजयः स्वयंवरस्थामहरत्साम्बो जाम्बवतीसुतः १ ब
कौरवाः कुपिता ऊचुर्दुर्विनीतोऽयमर्भकः कदर्थीकृत्य नः कन्यामकामामहरद्बलात् २ बध्नीतेमं दुर्विनीतं किं क
रिष्यन्ति वृष्णयः येऽस्मत्प्रसादोपचितां दत्तां नो भुञ्जते महीम् ३ निगृहीतं सुतं श्रुत्वा यद्येष्यन्तीह वृष्णयः भग्न
दर्पाः शमं यान्ति प्राणा इव सुसंयताः ४ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः साम्बमारेभिरे योद्धुं कुरुवृद्धा
नुमोदिताः ५ दृष्ट्वानुधावतः साम्बो धार्तराष्ट्रान्महारथः प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ६ तं तेजि
घृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ७ सोऽपविद्धः कुरु
श्रेष्ठ कुरुभिर्यदुनन्दनः नामृष्यत्तदचिन्त्यार्भः सिंहः क्षुद्रमृगैरिव ८

समितिंजयः संग्रामजित् १ २ नोऽस्माकं महीं अस्माभिर्दत्तां न तु भूमिपतय इति भावः ३ यान्ति यास्यन्ति प्राणा इन्द्रिया
णि सुसंयताः प्राणायामादिभिर्दमिताः ४ कुरुवृद्धो भीष्मः तेनानुमोदिताः ५ तस्थौ स्थिताः षडेकत्वार्थः ६ कर्णो
ऽग्रणीर्येषां ते ७ नामृष्यदना सहत् अचिन्त्यस्य भगवतोऽर्भकः अचिन्त्यो वा सावर्भकश्चेति वा ८ ९ श्रीस्म श्रीराम
५०

जास्या स्वभावेनैव चापल्यं यासां ताः १२ हेलयामास अवजज्ञे । निरीक्षितो निरीक्ष्यमाणस्य तमनादृत्येत्यर्थः १३ १४ आ
स्फालयत् योषितां वासांसि आकृष्य पाटितवान् विप्रचक्रे विप्रचक्रे एवमपकृतवान् १५ १६ शालं वृक्षम् १७ मुन
[illegible] दुष्टःशाखामृगःशाखामारूढःकंप
यन्द्रुमान् चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ११ तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः हास्यप्रिया वि
जहसुर्बलदेवपरिग्रहाः १२ ताहेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः दर्शयन्स्वगुदं तासां रामस्य च निरीक्षितः १३
तं ग्राव्णा प्राहरत्क्रुद्धो बलः प्रहरतांवरः सवंचयित्वा ग्रावाणं मदिराकलशं कपिः १४ गृहीत्वा हेलयामास धूर्त
स्तं कोपयन्हसन् निर्भिद्य कलशं दुष्टो वासांस्यास्फालयन्बलम् १५ कदर्थीकृत्य बलवान्विप्रचक्रे मदोद्धतः
तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् १६ क्रुद्धो मुसलमादत्त हलं चारिजिघांसया द्विविदोपि महावीर्यः
शालमुद्यम्य पाणिना १७ अभ्येत्य तरसा तेन बलं मूर्द्धन्यताडयत् तं तु संकर्षणो मूर्द्ध्नि पतन्तमचलो यथा १८
२५ प्रतिजग्राह भगवान्सुनन्देनाहनच्च तम् मुसलाहतमस्तिष्को विरेजे रक्तधारया १९ गिरिर्यथा गैरिकया प्रहारं
नानुचिन्तयन् पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा २० तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाच्छिनत् ततो न्येन रुषा
जघ्ने तं चापि शतधाच्छिनत् २१ एवं युध्यन् भगवता भग्ने भग्ने पुनः पुनः आकृष्य सर्वतो वृक्षान्निर्वृक्षमकरोद्वन
म् २२ ततो मुञ्चच्छिलावर्षं बलस्योपर्यमर्षितः तत्सर्वं चूर्णयामास लीलया मुसलायुधः २३ स बाहू तालसं
काशौ मुष्टीकृत्य कपीश्वरः आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् २४ यादवेन्द्रोपि तं दोर्भ्यां त्यक्त्वा मुसललां
गुले जत्राव भ्यर्दयत्क्रुद्धः सोपतद्रुधिरं वमन् २५

न्देन मुसलेनाहनत् अहनदित्यर्थः तं वानरम् १८ मस्तिष्कं मस्तकान्तर्वर्ति विरोवा गैरिकया लोहितया धातुना नान्व

वीर्य्यप्रभावं० शौर्य्यउत्साहः बलंसत्त्वं तैउन्नतं उक्तबलम् आत्मनः शक्तेः सम्मं अनुरूपम् २३ उपानत्पादरु
गाशिर आरोढुमिच्छति हीनाः अस्माना सापयन्ती सद्यः २४ अस्मैवप्रपंचः एतद्वितिचतुर्भिः योनेनएष्यायाविवा

वीर्य्यशौर्य्यवलोन्नद्धमात्मपक्षि मममंवचः कुरवोवलदेवस्यनिशम्योचुःप्रकोपिताः २३ कुरवऊचुः अहोमह
हच्चित्रमिदंकालगत्यादुरत्ययाः आरुरुक्षत्युपानद्वैशिरोमुकुटसेवितम् २४ एतेयोनेनसम्बद्धाःसहश
य्यासनासनाः वृष्णयस्तुल्यतांनीताअस्मद्दत्तनृपासनाः २५ चामरव्यजनेशंखमातपत्रंचपाण्डरम्
किरीटमासनंशय्यांभुंजन्त्यस्मदुपेक्षया २६ अलंयदूनांनरदेवलांछनैर्दातुःप्रतीपैःफणिनामिवामृतं
ये पन्नप्रसादोपचिताहियादवाःप्रशासत्यद्यगतत्रपावत २७ कथमिन्द्रोपिकुरुभिर्भीष्मद्रोणा
र्जुनादिभिः अदत्तमवरुंधीतसिंहग्रस्तमिवारणः २८

हेन २५ किंच० चामरव्यजनेइति भुजन्तिउपभुंजन्तइत्यर्थः अस्मदुपेक्षया अस्माकमनाग्रहेण २६ अल
मिति अतःपरंतान्नपहरिष्यामइत्यर्थः २७ अवरुन्धीतस्वीकुर्य्यात् २८ श्रीगणेशायनमः श्रीरामनारायण कृष्ण
५१

तस्य पंकजति चतुर्भीरिति चतुर्भिश्च तुरङ्गत्यत्रवाप्यानुसंधेया तत्कर्मनते संमानितवंतः १० ११ स्वस्य दुर्योधनस्य कन्यां चनीतो
निशेषः २२ पतंः कलिंनेघत् । अतः सात्वयित्वा जगामेति २३ २४ धृतराष्ट्रप्रतिबुभुत्सयेति ग्रीनिप्राया जिज्ञासयेत्यर्थः २६ विजि

विस्फूर्ज्य ललितं चापं सर्वान्विव्याध सायकैः कर्णादीन्षड्यान्वीरस्तावद्भिर्युगपत्पृथक् ९ चतुर्भिश्च तुरो वाहानेकैकेन च
सारथीन् रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् १० तन्तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् एकस्तु सारथिं जघ्ने चिच्छेदा
न्यः शरासनम् ११ तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि कुमारं स्वस्य कन्यां च स्वपुरं जयिनो विशन् १२ तच्छ्रुत्वा ना
रदात्तेन राजन्सञ्जातमन्यवः कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः १३ सान्त्वयित्वा तु तान्रामः सन्नद्धान्वृष्णिपुंगवा
न् नैच्छत्कुरूणां वृष्णीनां कलिं कलिमलापहः १४ जगाम हास्तिनपुरं रथेनादित्यवर्चसा ब्राह्मणैः कुलवृद्धैश्च वृत
श्चन्द्र इव ग्रहैः १५ गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया १६ सोभिवंद्याम्बिका
पुत्रं भीष्मं द्रोणं च बाह्लिकम् दुर्योधनं च विधिवद्राममागतमब्रवीत् १७ तेऽतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तम
म् तमर्चयित्वाभिययुः सर्वे मंगलपाणयः १८ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन् तेषां ये तत्प्रभावज्ञाः प्रणे
मुः शिरसा बलम् १९ बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयम् परस्परमथो रामो बभाषेऽविक्लवं वचः २० उग्र रामो नाम २
सेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः तदव्यग्रधियः श्रुत्वा कुरुध्वमविलंबितम् २१ यद्यूयं बहवस्त्वेकं जित्वा
धर्मेण धार्मिकम् अबध्नीताथ तन्मृष्ये बंधूनामैक्यकाम्यया २२ ॥

वदन्निवं २७ तमभ्यर्चयित्वा सात्वतं मंगलपाणयः उपायनहस्ताः २८ वृद्धाः प्रणिपेतुः २९ १२ यद्यूयमि
त्यादि उग्रसेनस्य वाक्यम् मृष्ये सहे अबध्नीतमानीय समर्प्य यतिशेषः २२ श्रीगणेशाय नमः श्रीराधावल्लभो जयति ॥

लांगलाग्रेण दलितेन ... ॥ ४१ ॥ ४४ नीजी विष्वक् ... लोढ्वं ॥ ४३ ॥ ४४ ॥ ४५ ॥ द्वितीय पदे परिशिष्यमाणे
यः सबलमेवेति वा ॥ ४६ ॥ ... कोपस्त इति स्थितिपालने तत्परः । ... वान् कोपः पाठांतरे संबोधनं ॥ ४७ ॥ विश्वं कर्मेणा संप

मीशमानिनां धत्तेनुशासनंभूमंस्तदत्यंतविडंबनं ३ नह्येकस्याद्वितीयस्यब्रह्मणःपरमात्मनः कर्मभिर्वर्धतेतेजोह्रस
तेचयथारवेः ४ नवैतेजितभक्तानांममाहमितिमाधव त्वंतवेतिचनानाधीःपशूनामिववैकृता ५

यंमायापरमात्मानइतिसर्वजीवनियंतृत्वनियम्यत्वसमत्वंनवास्तवंअतः परानुग्रहार्थैरेतैःकर्मभिस्तवतेजोनवर्धतेन
चह्रसतिरवेरिवोदयास्तमयादिकर्मभिरित्यर्थः तथाचश्रुतिः नकर्मणावर्धतेनोकनीयानिति ४ नन्वेवमप्यहंपरमेश्वरः
ममेदंनीचंकर्मायोग्यमितिमनसिकथंनभवेदतआहनवैतइति हेअजितत्वद्भक्तानामेवतावदियंनानाधीर्भेदमतिर्नास्ति
यथापशूनामज्ञानांवैकृताशरीरविषयात्तवतुनास्तीतिकिंपुनर्वक्तव्यमित्यर्थः ५

ॐ भा० द० उ ६८

68

आत्मना क्रियमाणमर्हणमात्मनः कथं स्यात्तत्राह सर्वभूतानामात्मभूताय अनन्यदर्शिने निरस्तभेदमतये २४ श्रीकृष्णानुभाववित्सहदेवस्तूष्णीमभूत् २५ द्विजेरितं साधु साध्विति वाक्यं श्रुत्वा हार्दं मनोभिप्रायं २६ २७ हे सदसस्पतयः सर्वे बालभाषितं मामन्यध्वं मा जानीत मा गणयत इति
किं तत् यत् यतः कृष्णोऽर्हणे संमतः तत्र ३२ ३३ अस्यैव वास्तवोर्थः स्फुटं वक्ष्यते गोपालः इति वेदपृथिव्यादिपालकः इत्यर्थः कुत्सितं वेदविप

सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने देयं शांताय पूर्णाय दत्तस्यानंत्यमिछता २४ इत्युक्त्वा सहदेवोभूत्तूष्णीं कृष्णानुभाव
वित् तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः २५ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां समर्हयद्धृषीकेशं प्रीतः प्र
णयविह्वलः २६ तत्पादाववनिज्यापः शिरसा लोकपावनीः सभार्यः सानुजामात्यः सकुटुंबो वहन्मुदा २७ वासोभिः पीत
कौशेयैः भूषणैश्च महाधनैः अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं २८ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो जनाः न
मो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः २९ इत्थं निशाम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः उत्क्षिप्य बा
हुमिदमाह स[द]स्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ३० ईशो दुरत्ययः काल इति सत्यवती श्रुतिः वृद्धानाम
पि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ३१ यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितं सदसस्पतयः सर्वे कृष्णो यत्सम्मतोर्हणे
३२ तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् परमर्षीन्ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ३३ सदसस्पतीनतिक्र
म्य गोपालः कुलपांशनः यथा काकः पुरोडाशं सपर्यां कथमर्हति ३४

रीतं लपंतीति कुलपाः पाखंडास्तान् अंसते समाघातयतीति तथा सः अकाकः कं च अकं च काके सुखदुःखे ते न विद्येते यस्य सः अ राम
काकः आप्तकामः इत्यर्थः यथा आप्तकामो दिव्यो गंधर्वैः केवलं पुरोडाशमात्रं नार्हति अपितु सर्वं यज्ञमपि तथायं श्रीकृष्णोपि ब्रह्मर्षि ६८
योग्यसपर्यामात्रं कथमर्हति किं त्वात्मसमर्पणमप्यर्हतीत्यर्थः ३४

सुत्येहनिसोमाभिषवदिने १७ अग्र्यार्हणंअग्रपूजातस्यार्हं योग्यं अनेकत्वात् योग्यानांबहुत्वेनैकस्यानिश्चयात् १८ १९ सांख्यंतत्त्वज्ञानंयोग
उपासना २० ननुसांख्यंकेवलात्मपरं योगः सविशेषणपरः कथमुभयोरेकपरत्वंतत्राह एकएवाद्वितीयोसौ अतःसांख्यस्यैवतत्परत्वंयुक्तं
विशेषणभूतस्यचसर्वस्यचतन्मयत्वात्सविशेषणविषयस्ययोगस्यापियुक्तमद्वितीयपरत्वमित्याह एतदात्म्यमिति एषःश्रीकृष्णः

सुत्येहन्यवनीपालोयाजकान्सदसस्पतीन् अपूजयन्महाभागान्यथावत्सुसमाहितः १७ सदस्याग्र्यार्हणार्हंवै
विमृशन्तःसभासदः नाध्यगच्छन्ननेकत्वात्सहदेवस्तदाब्रवीत् १८ अर्हतिह्यच्युतःश्रैष्ठ्यंभगवान्सात्वतांपतिःए
षवैदेवताःसर्वादेशकालधनादयः १९ यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः अग्निराहुतयोमन्त्रासांख्यं
योगश्चयत्परः २० एकएवाद्वितीयोसावैतदात्म्यमिदंजगत् आत्मनात्माश्रयःसभ्याःसृजत्यवतिहन्त्यजः २१
विविधानीहकर्माणिजनयन्यदवेक्षया ईहतेयदयंसर्वःश्रेयोधर्मादिलक्षणं २२ तस्मात्कृष्णायमहतेदी
यतांपरमार्हणं एवंचेत्सर्वभूतानामात्मनश्चार्हणंभवेत् २३

आत्मायस्यतत् एतदात्मतस्यभावऐतदात्म्यंभवितर्येवभावनिर्देशः एतदात्मकमिदंसर्वमितिफलितं अत्रहेतुः आत्मनेति
हेसभ्याः आत्माश्रयः अन्यनिरपेक्षःस्वयमजइदंजगत्सृजति अवतिहन्तिचेति २१ किंचविविधानीतियस्यावेक्षया अनुग्र
हेणविविधानिकर्माणितद्योग्यानिजनयन्कुर्वन् यतःयस्मात् अयंसर्वोपिजनोधर्मादिलक्षणंश्रेय ईहतेसाधयतिकर्मा
णितत्फलानिचयदधीनानीत्यर्थः २३

ॐ
भा० द०
७
६९

४१ ४३ तावदुत्थायेत्यस्यायमभिप्रायः एष महापार्षदो मत्तुल्यबलः सर्वानेतान् हन्यात् अतो मयैव शीघ्रं हन्तव्य इति तत्क्षणमेवास्याय शिरो जहारेति
तत्र एवं प्रवस्थाशिशुपालः स राजा तस्मिन् जन्मनि चतुर्भुजः तदा सर्वे सुहृदो दमघोषादयः उत्पातो यं शंकितचित्ता बभूवुः तदैवाकाशवाणी बभूव
महावीरोयमजरोमरो भविष्यति परं तु यस्योत्संगे प्रभुगतस्य वा तस्य लोचनमेकं भुजौ चोपतिष्यति तेन मृत्युर्भविष्यतीत्युवाच ततो दमघोष
एष पुत्रोत्सवे सर्वान्नृपतीन् सुहृदश्चाकार्य पृथक् २ सर्वेषामुत्संगे न्यस्तः यदा कृष्णोत्संगे मुक्तः तदा द्विभुजो द्विनेत्रश्च जातः मात्राया चितः

निंदां भगवतः श्रुत्वा तत्परस्य जनस्य वा ततो नापैति यः सोपि यात्यधः सुकृतात् च्युतः ४१ ततः पांडुसुताः क्रुद्धा मत्स्यके
कयसृंजया उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ४२ ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी भर्त्सयन् कृष्णपक्षीयान्
रा[illegible]ज्ञः सदसि भारत ४३ तावदुत्थाय भगवान् स्वान्निवार्य स्वयं रुषा शिरः क्षुरांतचक्रेण जहारापततो रिपोः ४४ शब्दः को
लाहलोप्यासीत् शिशुपाले हते महान् तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ४५ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपावि
शत् पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४६ जन्मत्रयानुगुणितवैरसंरब्धया धिया ध्यायंस्तन्मयतां जातो भावो
हि भवकारणं ४७ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात् सर्वान् संपूज्य विधिवच्चक्रेवभृथमेकराट् ४८ साधयि
त्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः उवास कतिचिन्मासान् सुहृद्भिरभियाचितः ४९ ततोनुज्ञाप्य राजानमनिच्छतमपीश्व
रः ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ५० वर्णितं तदुपाख्यानं मया ते बहुविस्तरं वैकुंठवासिनोर्जन्म विप्रशापात् पुनः
राजसूय १ पुनः ५१ वभृथेन स्नातो राजा युधिष्ठिरः ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५२

कृष्णः वत्समत्त्रायाभयं देहि कृष्णेनोक्तं अपराधानां शतं सोढास्मि अतः परं मे न दोषः अत एव राज्ञो युधिष्ठिरस्य राजसूये हतः ४४ ४६ राम
नन्वेवं निंदकस्य कृष्ये वासुदेवे प्रवेशः कुत आह जन्मत्रयेष्वनुगुणितमनुवर्तितं यद्वैरं तेन संरब्धया आविष्टया तन्मयतां तत्स्वरूपतां यातः ६९
पुनः पार्षदो बभूवेत्यर्थः अत्र हेतुः भावो हीति भावो भावना अनुध्यानं भवस्य ध्येयाकारजन्मनः कारणं पेशस्कारीध्यानेन कीटस्येव तथा
दृष्टत्वादित्यर्थः ४७ ५२

69

वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात् अनामगोत्रमिति श्रुतिः अत एवानधिकारित्वात् सर्वैः धर्मैः बहिः कृतः स्वैरवर्त्ती परमेश्वरत्वात् अत एव
निर्गुणः तमआदिरहितः एवंभूतो जीवानां योग्यं तुच्छं सपर्यामात्रं कथमर्हतीत्यर्थः ३६ अपि च कथं वर्णनीयो मादृशेरेषाय दुनाम हिमाय
स्मादेषां कुलं ययातिना शप्तमयि किं सद्भिर्बहिः कृतं अपि तु शिरसा धृतं किं च अस्मदादिकुलवत् किं वृथापानरतं अपि त्वति निपाताचार
मित्यर्थः अहो यदूनामेव तावदीदृशां महात्म्यं ये दुष्कुलत्वं दृष्ट्वा ययातिः शापेन प्राभृदिगादि अयं तु साक्षादीश्वरः अतः सपर्यामात्रं कथमर्ह
तीत्यर्थः ३७ किं च ये राजानो दुष्टा नुच्चाटयंति तन्नद्यर्थे कीकटादिदेशानप्याश्रयंति एते तु ब्रह्मर्षिसेवितानि वदेशान्नाश्रित अब्रह्मवर्चसे

वर्णाश्रमकुलापेतः सर्वधर्मबहिः कृतः स्वैरवर्त्ती गुणैर्हीनः सपर्यां कथमर्हति ३६ ययातिनैषां हि कुलं शप्तं सद्भिर्बहिः
कृतं वृथापानरतं शश्वत्सपर्यां कथमर्हति ३७ ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसं समुद्रं दुर्गमाश्रित्य बाधंते दस्य
वः प्रजाः ३८ एवमादीन्यभद्राणि बभाषे नष्टमंगलः नोवाच किंचिद्भगवान्यथा सिंहः शिवारुतं ३९ भगवन्निंदनं श्रुत्वा दुः
सहं तत्सभासदः कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ४०

समुद्रं दुर्गमपि हित्वा शापयित्वेत्यर्थः वा ? धंति तपायाः दस्यवः प्रजाः ताश्च अयमर्थः वेदतद्धर्मियोगो ब्रह्मवर्चसं तत् विरुद्धम् अब्रह्मवर्च
सं समुद्रं मुद्रा त्रिलिंगतत्सहितं समुद्रं वेदविरुद्धलिंगधारिणां पाषंडमित्यर्थः तल्लिंगं त्याजयित्वा वा धंते दंडयंति कथंभूतं दुर्गं धर्मवित्
प्रतीतिरधर्मितया दुर्ज्ञेयमित्यर्थः तथा दस्यवः दस्यवनपि प्रजाः ये वर्णा वर्तमाना नदंडयंति अतो यदुभ्यो न्यः को नाम धार्मिकोऽस्तीति
पारुष्यं तत्त्वानार्थमेव ३८ शिवा फेरुस्तस्या रुतं अश्लाघ्यं यथा सिंहो न किंचिन्ब्रूते तद्वत् ३९ ४०

ऋत्विजश्च सदस्याश्च सभासदः बहुविदश्च तेषु स्विष्टेषु सम्यक्पूजितेषु सूनृतं प्रियवाक् समर्हणमलंकारादि दक्षिणाश्च प्रसिद्धास्ताभि
: द्युनद्यां गंगायां ८ ९ १० चित्राणि ध्वजपताकाग्राणि येषु तैरिभेंद्रैः स्यंदनैः अर्वभिश्चाश्वैः भटैः एवं चतुरंगैः सैन्यैर्निर्ययुः ११ यजमानो
युधिष्ठिरः पुरःसरो येषां ते १२ सदस्या ऋत्विजोऽन्ये च द्विजश्रेष्ठाः निर्ययुः १३ किं च गंधादिभिः स्वलंकृताः नरा नार्यश्च मिथो विजह्रुः १४

ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथ
स्नपनं द्युनद्यां ८ मृदंगशंखपणवधुंधुर्यानकगोमुखाः वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ९ नर्तक्यो ननृतु
र्हृष्टाः गायका यूथशो जगुः वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् १० चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्व
भिः स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ११ यदुसृंजयकांबोजकुरुकेकयकोशलाः कंपयंतो भुवं सैन्यैर्यज
मानपुरःसराः १२ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः १३ स्वलंकृ
ता नरा नार्यो गंधस्रग्भूषणांबरैः विलिंपंत्योऽभिषिंचंत्यो विजह्रुर्विविधै रसैः १४ तैलगोरसगंधोदहरिद्रासांद्र
कुंकुमैः पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः १५ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमान
वरैर्नरेंद्र्यः ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः १६

रसानेवाह तैलेति किंच सांद्रकुंकुमादिभिः पुंभिर्लिप्ताः तान्प्रलिंपंत्यो वारयोषितश्च विजह्रुः १५ नृभिर्गुप्ता रथादियानैः नरेंद्रस्य
राजपत्न्यो निरगमन् निरगुः एतदुपलब्धुं विमानवरैर्देव्यो यथा तद्वत् मातुलेयैः सखिभिः स्वपतिभिः सिच्यमानाः सव्रीडेन हासेन
विकसंति वदनानि यासां ताः १६

70

सुराःमानवाःखेचराःप्रमथाश्चयथायथंपूजिता ५३ पापंधर्मद्विषंअत्रहेतुःकलिंकलेरंशं अतएवकुरुकुलस्यामयंव्याधिंनाशकं ५४ विता
नंयज्ञंच ५५ इतिदशमेचतुःसप्ततितमः ७४ पंचसप्ततितमेयज्ञावभृथसंभ्रमः सुयोधनस्यचात्रापमानमोहशिभ्रमात् १ दुर्योधन
स्यैकस्यैवदुःखकारणंप्रभुमुक्तामनुवदति अजातशत्रोरिति १ इतिअतःतत्वन्मुखादेवार्थः २ दुर्योधनस्यासहनकारणत्वेनया

राज्ञासभाजिताःसर्वेसुरमानवखेचराः कृष्णंक्रतुंचशंसंतःस्वधामानिययुर्मुदा ५३ दुर्योधनमृतेपापंकलिंकुरुकुला
मयं योनसेहेश्रियंस्फीतांदृष्ट्वापांडुसुतस्यतां ५४ यइदंकीर्तयेद्विष्णोःकर्मचैद्यवधादिकं राजमोक्षंवितानंचसर्वपापैः
प्रमुच्यते ५५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेशिशुपालवधोनामचतुःसप्ततितमोऽध्यायः ७४ राजोवाच अजात
शत्रोस्तंदृष्ट्वाराजसूयमहोदयं सर्वेमुमुदिरेब्रह्मन्नृदेवायेसमागताः १ दुर्योधनंवर्जयित्वाराजानःसर्षयःसु
राः इतिश्रुत्वाततोभगवंस्तत्रकारणमुच्यतां २ ऋषिरुवाच पितामहस्यतेयज्ञेराजसूयेमहात्मनः बांधवाःपरि
चर्यायांतस्यासन्प्रेमबंधनाः ३ भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः सहदेवस्तुपूजायांनकुलोद्रव्य
साधने ४ गुरुशुश्रूषणेजिष्णुःकृष्णःपादावनेजने परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ५ युयुधानोविकर्णश्च
हार्दिक्योविदुरादयः बाह्लीकपुत्राभूर्याद्यायेचसंतर्दनादयः ६ निरूपितामहायज्ञेनानाकर्मसुतेतदा प्रव
र्तंतेस्मराजेंद्रराज्ञःप्रियचिकीर्षया ७

गमहोत्सवमेवपुनःसिंहावलोकनेननिरूपयतिपितामहस्येत्यादिना एकदांतःपुरेतस्येत्यतः भक्तेनेनयंयेनप्रेमबंधनाःप्रे
मयंत्रिताः ३ पूजायांसम्माननेद्रव्यसाधनेनानावस्तुसंपादने ४ गुरुशुश्रूषणेचंदनालेपादौ ५ ६ निरूपितानियुक्ताःसंतो
नानाकर्मसुप्रवर्त्तंतेस्म ७

भाट॰ उ॰ २८।२९।गतज्वरः निश्चिंतः आसीत् ३० अच्युते आत्मा यस्य तस्य ३१ नरेंद्रादीनां लक्ष्म्यः विभूतयः विश्वसृजा मयेन उपक्लृप्ताः विरचिताः
७१ ताभिः सह कुरुराट् दुर्योधनोऽतप्यत् ३२ महिषीसहस्रमिति बहुत्वोपलक्षणं क्वणद्भिरंघ्रिभिः शोभा यस्य मध्ये सुचारु सुचारुमध्यमित्य
र्थः कुचकुंकुमैः शोणा हारा यस्य तत् श्रीमंति मुखानि यस्य तत् चलैः कुंडलैः कुंतलैश्चाढ्यं संपन्नं शोभते इति शेषः क्वापि कदाचित् विराजेदिति

ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् प्रेम्णा निवारयामास कृष्णं च त्यागकातरः २८ भगवानपि तत्रांग न्यवात्सीत्तत्प्रियंक
रः प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं २९ इत्थं राजा धर्मसुतो मनोरथमहार्णवं सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गत
ज्वरः ३० एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ३१ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रल
क्ष्मीर्नानाविभांति किल विश्वसृजोपक्लृप्ताः ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ३२
यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं मध्ये सुचारुकुचकुंकुमशोणहारं श्रीमन्मुखं प्र
चलकुंडलकुंतलाढ्यं ३३ सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिराट् वृतोऽनुगैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ३४ आ
सीनः कांचने साक्षादासने मघवानिव पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ३५ तत्र दुर्योधनो मानी परीतो भ्रातृभि
र्नृप किरीटमाली न्यविशदसिहस्तः क्षिपन् रुषा ३६ स्थलेऽभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थलेऽपतत् जले च स्थलवद्भ्रांत्या मयमायाविमो
हितः ३७

शेषः स्वस्य चक्षुषा हिताहितज्ञापकेन ३४।३५ मानी साहंकारः किरीटं च माला च विद्येते यस्य सः न्यविशत् विवेश क्षिपन् रुषा द्वाःस्था
दीन् आधिक्षिपन् ३६ तत्र स्थले वस्त्रांतमभ्यगृह्णात् आकुंचितवान् कुतः तस्मिन् स्थल एव भ्रांत्या तस्मिन् जले च अपतत् कुतः जलं मत्वा ७१
स्थलवद्भ्रांत्या ३७

भा.र.७५. देवरान्पतिभ्रातॄन्उतसखीनपितृतीर्दृतिभिरुदकसेचकचर्मयंत्रैः सेचनपात्रैः मलधियां कामिनां १७ क्रियाभिरंगक्रियाभिः क्रतुराट् ससारीरो
राजसूयश्च १८ पत्नीसंयाजो यागविशेषः अवभृथसंबंधि आवभृथ्यं चते श्चरित्वा तान् अनुष्ठायेत्यर्थः १९ २० अर्हति नजने आनर्च आर्चितवान् २२

तादेवरानुतसखीनसिषिचुर्दृतिभिःक्लिन्नांबरा विवृतगात्रकुचोरुमध्याः औत्सुक्यमुक्तकवराच्च्यवमानमाल्याः क्षोभंद
धुर्मलधियांरुचिरैर्विहारैः १७ ससम्राड्रथमारूढःसदश्वंरुक्ममालिनं विरोचतस्वपत्नीभिःक्रियाभिःक्रतुराडिव १८ पत्नीसंया
जावभृथ्यैश्चरित्वातेतमृत्विजः आचांतंस्नापयांचक्रुर्गंगायांसहकृष्णया १९ देवदुंदुभयोनेदुःनरदुंदुभिभिःसमं मुमुचुः
पुष्पवर्षाणिदेवर्षिपितृमानवाः २० सस्नुस्तत्रततःसर्वेवर्णाश्रमयुतानराः महापातक्यपियतःसद्योमुच्येतकिल्बिषात्
२१ अथराजाहतेक्षौमेपरिधायस्वलंकृतः ऋत्विक्सदस्यब्रह्मादीनानर्चाभरणांबरैः २२ बंधुज्ञातिनृपान्मित्रसुहृदोन्यांश्च
सर्वशः अभीक्ष्णंपूजयामासनारायणपरोनृपः २३ सर्वेजनाःसुररुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ
हाराः नार्यश्चकुंडलयुगालकवृंदैराराजानोयेसमागताः २५ देवर्षिपितृभूतानिलोकपालाःसहानुगाः पूजितास्तम
नुज्ञाप्यस्वधामानिययुर्नृप २६ हरिदासस्यराजर्षेराजसूयमहोदयं नैवातृप्यन्प्रशंसंतःपिबन्मर्त्योमृतंयथा २
जुष्टवक्त्रश्रियःकनकमेखलयाविरेजुः २४ अथर्त्विजोमहाशीलाःसदस्याःब्रह्मवादिनः ब्रह्मक्षत्रियविट्शूद्र २

२२।२३ सुराणामिवरुक्कांतिर्येषांतेमणिकुंडलैःसहिताःस्रगुष्णीषादयोयेषांतेकुंडलयुगेनालकवृंदेनचजुष्टावक्त्रेलक्ष्मीर्या
सांताः २४।२५।२६।२७ ॐनमोभगवतेवासुदेवायनमः

तथेति प्रतिज्ञाय गिरिशेनादिष्टः अयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय रचयित्वा प्रादात् ७ तमसो धकारस्य धाम आश्रयं अन्यैर्दुरासदं दुःप्राप्यं ८।९
प्रासाद गृहाः अट्टालानि तदुपरिगृहाः तोलिकास्तत्पर्यन्तकुड्यानि ताः विहारान् क्रीडास्थानानि चसव भंज किंच विमानाग्र्यान् तस्मात् शस्त्रवृष्ट्यादयः

देवासुरमनुष्याणां गंधर्वोरगरक्षसां अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं ६ तथेति गिरिशादिष्टो मयः परपुरंजयः पुरं निर्माय
शाल्वाय प्रादात्सौभमयस्मयं ७ स लब्ध्वा कामगं यानं तमोधाम दुरासदं ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ८ निरुध्य
सेनया शाल्वो महत्या भरतर्षभ पुरीं बभंजोपवनान्युद्यानानि च सर्वशः ९ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिका विहा
रान्स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः शिलाद्रुमाश्चाशनयः सर्पा आसारशर्कराः प्रचंडश्चक्रवातोभूद्रजसाच्छादिता दि
शः ११ इत्यर्द्यमानाः सौभेन कृष्णस्य नगरी भृशं नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही १२ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना
निजाः प्रजाः मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महारथः १३ सात्यकिश्चारुदेष्णश्च सांबोक्रूरः सहानुजः हार्दिक्यो भानुविंदश्च शुक गदश्च
सारणौ १४ अपरे च महेष्वासा रथयूथपयूथपाः निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः १५ ततः प्रववृते युद्धं शाल्वा
नां यदुभिः सह यथासुराणां विबुधैस्तुमुलं लोमहर्षणं १६ ताश्च सौभपतेर्माया दिव्यास्त्रैः रुक्मिणीसुतः क्षणेन नाशयामा
स नैशं तम इवोष्णगुः १७

72

पेतुः १० आसारसर्कराः धारासंपातवज्रोपमाः ११ शं सुखं नाभ्यपद्यत १२।१५ तुमुलं व्याकुलं लोमहर्षणं रौद्रं १६ नैशं निशि भवं तमः उष्णगुः सूर्यः
रवि १७

३८ भुवो भारं जिहीर्षुरिति। अघसंपादितेन कल्महवाजेन कुरूणां संहारं करिष्यामीति मत्वेति किंचयस्य दृशा दृष्टिमात्रेण दुर्योधनो भ्रमातिस्म भ्रांतिप्रा
पमायानुनिमित्तमात्रं सः भूभारहरणे बीजं दुर्योधनभ्रमं भीमादिहास्येन च तस्य परानभवं विधाय तत्तूष्णीमासीदित्यर्थः ३८।४०॥ इति श्री भागवते दशमे पंचसप्त
तितमोऽध्यायः ७५ ततः षट्सप्ततितमे शाल्वमहामृधे द्युमद्गदाप्रहारेण रणात्प्रद्युम्ननिर्गमः १ संपाद्य धर्मराजस्य राजसूयमहोदयं त्विह स

जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ३८ सव्रीडितोऽवाग्वदनो रुषा ज्वलन्
निष्क्रम्य तूष्णीं प्रययौ गजाह्वयं हाहेति शब्दः सुमहानभूत्सताम् अजातशत्रुर्विमनास्त्वाभवत् बभूव तूष्णीं भगवान्भुवो भरं
समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा तेनैव कृष्णः प्राग्नरदेहमोहिनीमायानिमित्तं मतमेव केवलं ३९ एतत्तेऽभिहितं राजन्यत्पृष्टोऽ
हमिह त्वया सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ४० इति श्री भागवते महापुराणे दशमस्कंधे दुर्योधनस्य मानभंगो ना
म पंचसप्ततितमोऽध्यायः श्रीशुक उवाच अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप क्रीडानरशरीरस्य तिर २
यथा सौभपतिर्हतः १ शिशुपालसखः
शाल्वो रुक्मिण्युद्वाह आगतः यदुभिर्निर् ३
जितः संख्ये जरासंधादयस्तथा २ शाल्वः प्रतिज्ञामकरोत्
शृण्वतां सर्वभूभुजां अयादवां क्ष्मां करिष्ये पौरुषं मम पश्यत ३ इति मूढः प्रतिज्ञाय देवं पशुपतिं विभुं आराधयामास नृपः पांशुमु
ष्टिं सकृद्ग्रसन् ४ संवत्सरान्ते भगवानाशुतोष उमापतिः वरेण छन्दयामास शाल्वं शरणमागतं ५

सौभराजादीन यो पारमद्च्युतः २ प्रत्यहं सकृत्पांशुमुष्टिमेकोऽश्नन्नभक्षयन् ४ संवत्सरान्त इति आशुतोषोऽपि भगवानुमापतिः आकृष्य विहितमिशा
ल्वेवरस्यैव कत्वं मन्यमानो न शीघ्रं प्रादुरभूत् तस्यापि निर्बंधमालक्ष्य संवत्सरान्ते वरेण छन्दयामास इच्छां कारितवान् वरं वृणीष्वेत्सुवाचेत्यर्थः
५

भा॰द॰उ॰ अपोवाह अपनीतवान् २७।२८ मत् मत्तो विना क्लीबं चित्तं यस्य तेन त्वया सूतेन २९ पितरौ रामकृष्णौ अभिसंगम्य नत्वा संगत्वा ताभ्यां पृष्टः
७३ स्वयोग्यं किं तु वक्ष्यामि इति २९ भ्रातृजामयो भ्रातृभार्याः व्यक्तं निश्चितं मत्तः क्लैब्यं कथयिष्यन्ति किं कथनमनुकरोति कथं कथमिति ३१ विभो
हे समर्थ एतत् अपसर्पणं धर्मं माहं कृतम् इति अपोवाहितः अपनीतः उपसृष्टः उपसर्गं पीडां प्राप्त इति कृत्वा यतः परेण शत्रुणा गदया

प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिंदमम् अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः २७ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणम् २८ न यदूनां कुले जातः श्रूयते रणविच्युतः विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् २९ किं नु वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् ३० व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ३१ सारथिरुवाच धर्मं विजानतायुष्मन्कृतमेतन्मया विभो सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ३२ एतद्विदित्वा तु भवान्मयापोवाहितो रणात् उपसृष्टः परेणेति मूर्च्छितो गदया हतः ३३ इति श्रीभागवते महापुराणे दशमस्कन्धे षट्सप्ततितमोऽध्यायः ७६ श्रीशुक उवाच स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिम् १ विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् २ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ३

हतः सन् मूर्छितो नितः संज्ञतां गतो भवानिति ३३ इति दशमे षट्सप्ततितमः ७६ सप्तसप्ततितमे नानामायाविचक्षणः कृष्णेनागत्य
शाल्वस्तु हतः सौभं च चूर्णितं दंशितः सन्नद्धः १ विधमन्तं नाशयन्तं प्रतिहत्य प्रत्यविध्यत् २ अष्टाभिर्नाराचैः इति योग्यमाह चतुर्भिरिति ३।३॥ ७३

किंच विद्याधेति स्वर्णमयानि पुखानि प्रांता येषां तैः अयो लोहं तन्मयानि मुखान्यग्राणि येषां तैः ध्वजिनीपालं सेनान्यं संनतानि निम्नानि पर्वाणि
ग्रंथयो येषां तैः १८ सैनिकान् भटान् नेतॄन् सारथीन् १९ स्वपरसेनयोर्वर्त्तमानाः सर्वे पूजयामासुः संमानितवंतः २० कदाचिद्बहुरूपं कदाचिदेक
रूपं क्वचित् दृश्यते क्वचिन्न दृश्यते एवं दुर्विभाव्यं दुर्वितर्क्यमभूत् २१ किंच क्वचिदिति एवं तत् दुरवस्थितं अनवस्थितं चाभ्रमत् २२।२३ अग्नि

विद्याधः पंचविंशत्या स्वर्णपुंखैरयोमुखैः शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः १८ शतेनाताडयच्छाल्वमेकैकेनास्य सैनि
कान् दशभिः दशभिर्नेतॄन् वाहनानि त्रिभिस्त्रिभिः १९ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः दृष्ट्वा तं पूजयामासुः सर्वे स्वपर
सैनिकाः २० बहुरूपैकरूपं तत् दृश्यते न च दृश्यते मायामयं मयकृतं दुर्विभाव्यं परैरभूत् २१ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमू
र्ध्नि जले क्वचित् अलातचक्रवद्भ्राम्यत्सौभं तत् दुरवस्थितं २२ यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः शाल्वस्ततस्ततो मुंचन्
शरान् सात्वतयूथपाः २३ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः पीड्यमानपुरानीकः शाल्वो मुह्यत्परेरितैः २४ शाल्वानी
कपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली २६

नतत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः २५ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक् प्रपीडितः २

वह्न्यर्कवत् युगपत् सर्वतः संस्पर्शो येषां तैः आशीविषवत् एकदेशस्पर्शमात्रेण मारकत्वात् दुरासदैः दुःसहैः पीड्यमानं पुरं अनीकानि च यस्य
सः परैः प्रेरितैः मुमुक्षेः २४ ... शार्दितापि स्वं स्वं रणं लोकद्वयजिगीषवो न तत्यजुः प्रद्युम्नमासाद्य गदया व्याहत्य व्यनदत् २६ ॐ नमो भगवते वासुदेवाय

भा०१०उ० तंचशाल्वंशरसंजालैः स्वंसूर्यइवरश्मिभिरितिसूनील्वत्वविपुलत्वादिभिराकाशोपमासौभस्यअप्यंतवेगवत्त्वादितिरागोरश्मिसादृश्यं
७४ अयत्नेनेवरश्मिवत्शरजालप्रसारणात्सूर्यतुल्यः आरुरुधइति १४ दोर्बाहुं १५।१६ सख्युः शिशुपालस्यइच्छतामस्माकं प्रमत्तः

तंचघोरतराभिर्विध्यावाणैः सौभंचखेभ्रमत् अविध्यच्छरसंदोहैः खंसूर्यइवरश्मिभिः १४ शाल्वः शौरेस्तुदोःसव्यंसशार्ङ्गंशार्ङ्गध
न्वनः विभेदन्यपतद्धस्तात्शार्ङ्गमासीत्तदद्भुतं १५ हाहाकारोमहानासीद्भूतानांतत्रपश्यतां विनद्यसौभराडुच्चैरिदमाहजना
र्दनं १६ यत्त्वयामूढनःसख्युर्भ्रातुर्भार्याहृतेक्षतां प्रमत्तःससभामध्येत्वयाव्यापादितःसखा १७ तंत्वाद्यनिशितैर्बाणैरपराजित
मानिनं नयाम्यपुनरावृत्तिंयदितिष्ठेर्ममाग्रतः १८ श्रीभगवानुवाच वृथात्वंकत्थसेमंदनपश्यस्यंतकेंतकं पौरुषंदर्शयं
तिस्मशूरानबहुभाषिणः १९ इत्युक्त्वाभगवान्शाल्वंगदयाभीमवेगया तताडजत्रौसंरब्धःसचकंपेवमन्नसृक् गदायां
संनिवृत्तायांशाल्वस्त्वंतरधीयत २० ततोमुहूर्तआगत्यपुरुषःशिरसाच्युतं देवक्याप्रहितोस्मीतिनत्वाप्राहवचोरुदन्
२१ कृष्णकृष्णमहाबाहोपिताते पितृवत्सल बध्वापनीतःशाल्वेनसौनिकेनयथापशुः २२ निशम्यविप्रियंकृष्णोमा
नुषींप्रकृतिंगतः विमनस्कोघृणीस्नेहात्बभाषेप्राकृतोयथा २३ कथंराममसंभ्रांतंजित्वाजेयंसुरासुरैः शाल्वेनाल्पीयसा
नीतःपितामेबलवान्विधिः २४ इतिब्रुवाणेगोविंदेसौभराट्प्रत्युपस्थितः वसुदेवमिवानीयकृष्णंचेदमुवाचह। २५

अनवहितःव्यापादितःनिहतः १७ अपराजितोहमितिमानवंतं अपुनरावृत्तिंमृत्युंतिष्ठेःस्थास्यसि १८ घृणीदयावान् १९।२०।२१।२२।२३।२४।२५। ७४

सौभेयाः सौभस्थाः ४ नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्रीणां समाहारस्त्रिणवरात्रं शप्तविंशति रहोरात्राणीत्यर्थः तुमुलमाकुलं उल्ब
णं घोरं ५ परमतमुपन्यस्याति इंद्रप्रस्थं गतः इत्यादिना ६।७ आहूयेति युगांतमेव याधि चिंता विजृंभितमाभाषणं आर्यमित्राभिसंगतो बलभ

गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ४ एवं यदूनां शाल्वानां निघ्नतामितरेतरं
युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ५ इंद्रप्रस्थं गतः कृष्णमाहूतो धर्मसूनुना राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते
६ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां निमित्तान्यतिघोराणि पश्यन् द्वारवतीं ययौ ७ आह चाहमिहायात आर्यमि
त्राभिसंगतः राजन्याश्चैद्यपक्षीयाः नूनं हन्युः पुरीं मम ८ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं सौभं च शाल्वराजं च दा
रुकं प्राह केशवः ९ रथं प्रापय मे सूत शाल्वस्यांतिकमाशु वै संभ्रमस्ते न कर्तव्यो मायावी सौभराडयं १० इत्युक्तश्चोदयामास
रथमास्थाय दारुकः विशंतं ददृशुः सर्वे स्वे परे चारुणानुजं ११ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः प्राहरत्कृष्णसूता
य शक्तिं भीमरवां मृधे १२ तामापतंतीं नभसि महोल्कामिव रंहसा भासयंतीं दिशः शौरिः सायकैः शतधाछिनत् १३

द्यादिसहितः ८ दुर्निमित्तदर्शनाकुलचित्तः एवं चिंतयन् द्वारकामागत्य स्वानां कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्यानयु
ज्य दारुकं प्राहेत्यन्वयः ९ तेत्वया। १० आस्थाय सम्यगधिष्ठाय अरुणानुजं ध्वजे यस्य तं प्रधानं गरुडं ११ हतप्रायस्य बलस्येश्वरः १२।१३।

किंच यस्य पादसेवयाऽर्जितया पुरुषस्यात्मा आत्मविद्यातया अनादिरात्मनो विपर्य्ययग्रहः अहं कृशः सुखी दुःखीत्यादिलक्षणः तं निरस्यंतिना
शयंति संतस्तमेश्वरं परं च तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं सत्यमित्यर्थः ३२ किं तर्हि सत्यं तदाह तं शस्त्रपूगैरिति वर्म कवचं ह

75

यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्य्ययग्रहं लभंत आत्मीयमनंतमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ३२ तं
शस्त्रपूगैः प्रहरंतमोजसा शाल्वं शरैः शौरिरमोघविक्रमः विध्वाछिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह
३३ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्य
गात् द्रुतं ३४ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोद
याचलः ३५ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः वज्रेण वृत्रस्य यथा पुरंदरो बभूव हाहेति वचस्तदा
नृणां ३६ तस्मिन्निपतिते पापे सौभे च गदया हते नेदुर्दुंदुभयो राजन् दिवि देवगणेरिताः सखीनामपचितिं कुर्वन् दंतवक्त्रो रु
षाभ्यगात् ३७ इति श्रीभागवते महापुराणे दशमस्कंधे सौभवधो नाम सप्तसप्ततितमोऽध्यायः ७७ श्रीशुक उवाच शिशुपालस्य शा
ल्वस्य पौंड्रकस्यापि दुर्मतिः परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदं १ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् पद्भ्यामिमां महाराज महासत्वो

रोज बभंज ३३।३४ लयार्कसन्निभं प्रलयकालीनसूर्यसदृशं ३५।३६ देवगणेरिताः किं च सखीनामिति ३७ इति दशमे सप्तसप्ततितमः ततोऽष्टसप्ततितमे
दंतवक्त्रविदूरथौ हत्वा हरिः पुरे रेमे रामस्तु तं ततोऽवधीत् १ सखीनामपचितिं कुर्वन्निस्युक्तं तदेवाह शिशुपालस्येति पारोक्ष्यसौहृदं परोक्षे करणीयं सु
हृत्कृत्यं ।१।२। ७५

जनिता जनपिता ईशश्चेत्त शक्तः चेत् २६।२७ स्वबोधः स्वतः सिद्धज्ञानवानपि स्वजनस्नेहतः प्रकृतौ मानुषत्वभावे उपप्लुतः निमग्नः आसीत् ग्र
तिष्ठत् ततः तत्सर्वमासुरीं मायामबुध्यत मायैषेति ज्ञातवान् ३० स्वाप्नं च स्वप्नप्रपंचं यथा २९ एवं परमतमुपन्यस्तं निराकरोति
एवमिति। केचित् केचन नान्विताः अनन्विताः पूर्वापरानुसंधानरहिताः तदाह यत्स्ववाचः इति तन्नानुस्मरंतीत्यर्थः अयमभिप्रायः तं नता

एष ते जनिता तातो यदर्थमिह जीवसि विधिष्ये वीक्षतस्तेऽमुमीशश्चेत्पाहि बालिशः २६ एवं निर्भर्त्स्य मायावी खड्गेनानकदुन्दुभेः उ
त्कृत्य शिर आदाय खस्थं सोमं समाविशत् २७ ततो मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंगतः महानुभावस्तदबुध्यदासु
रीं मायां स शाल्वप्रसृतां मयोदितां २८ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः स्वाप्नं यथा चांबरचारिणं रिपुं सौ
भस्थमालोक्य निहंतुमुद्यतः २९ एवं वदंति राजर्षे ऋषयः के च नान्विताः यत्स्ववाचो विरुद्ध्येत नूनं ते न स्मरंत्युत ३० क्व शोकमोहौ
स्नेहो वा भयं वा येऽज्ञसंभवाः क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ३१

वस्त्रानुसार्यर्थः रामेण सह गतः श्रीकृष्णः संकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ३० असंभावितं चेत्याह क्व शोकमोहाविति भयं वा दुर्निमित्त
दर्शनकृतं न नूनं हन्मः पुरोऽस्मेति यदुक्तं यच्च हस्तात्क्वाद्गं न्यपतदिति उक्तं तद्रूपं वा क्वेति अज्ञेषु संभवो येषां अखंडितानि विज्ञानज्ञानैश्वर्याणि यस्य सः
तत्र विज्ञानं स्वस्वविषयं ज्ञानं बाह्यविषयं ३१

एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेति तत्त्वा सकृदवित् जरासंधादिभिः निर्जित इति पशुदृष्टीनामीयते तन्निरसनायैवं तव? योगेश्वरः भग
वान्जगदीश्वर इति विहरतां तमामध्य पूतनादिः दनोः कुलं हत्वा स्वपारमन्ता राज्ञामोह स्वतवत्वलं ततश्च संगमा हस्तावेति प्रतिश्रोतं प्रतितो

गदया निहतो व्रजेन चापि कुरूद्वह कृष्णोपितमहन्गुर्व्या कौमोदक्या स्तनांतरे ८ गदानिर्भिन्नहृदय उद्वमन्रुधिरं मुखा
त् प्रसार्य केशबाह्वंघ्रीन्धरण्यां न्यपतदसुः ९ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं पश्यतां सर्वभूतानां यथा चैद्यवधे नृप
१० विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः आगच्छदसिचर्माभ्यामुच्छ्वसन्स्तज्जिघांसया ११ तस्य चापततः कृष्णश्चक्रेण क्षु
रनेमिना शिरो जहार राजेंद्र सकिरीटं सकुंडलं १२ एवं सौभं च साल्वं च दंतवक्त्रं महानुजम् हत्वा दुर्विषहानन्यैरीडितः सुरमा
नवैः १३ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः अप्सरोभिः पितृगणैर्यक्षैः किंनरचारणैः १४ उपगीयमानविजयः कु
सुमैरभिवर्षितः वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं १५ एवं योगेश्वरः कृष्णो भगवान्जगदीश्वरः ईयते पशुदृष्टीनां
निर्जितो जयतीति सः १६ श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल १७
स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः १८ पृथूदकं त्रितकूपं सुदर्श बिंर
नं विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं १९ यमुनामनु यान्येव गंगामनु च भारत जगाम नैमिषं यत्र ऋषयः सत्रमास
ते २०

तो पश्चिमवाहिनीम सुदर्शनं तीर्थं चक्रतीर्थं यमुनामनु यानि तीर्थानि गंगामनु च यानि तानि सर्वाणि गत्वा नैमिषारण्यं जगाम ः २० २० २०

प्रत्यधात् प्रतिरुरोध मुकुंदं प्राह दुर्मद इत्यादेराधिरेव परलोकदैव परमार्थाः दुर्मदः गतमदः प्राह मुकुंदं तृतीयेन न्यनिमुक्तिदानार्थमागतं इत्युक्ते तिनमत्र
ये प्यन्विष्यमाणो यत्र स्वेन शापावसाने भवान् मम स्वामी दृष्टिपथं गतः प्राप्तः एतत् दिष्ट्या मह्यं मह्यं अतिहर्षवीप्सा किं च हे श्री कृष्ण त्वमस्माकं मातुलेयो व
धुः एवमपि मित्रध्रुक् मित्राणि घातितवान् स मुक्तिदानार्थं न च मित्राणां मां च जिघांससि तस्मात् दस्माकं त्वत्तो मत्स्य सनकाद्यनुग्रहप्राप्तो न त्वं दुर्वारः अ
तस्त्वां मंदाज्ञानां नमहे या चे किं च तदाह हे अमंद सर्वसहनसमर्थ एतत् धर्मेणैव सेविनु गदया ताह निष्ये प्रहरिष्यामि तामेकवारे रूपया सह स्वेति

तंतथायांतिमालोक्यगदामादायसत्वरः अवप्लुत्यरथात्कृष्णः सिंधुंवेलेवप्रत्यधात् ३ गदामुद्यम्यकारूषो
मुकुंदंप्राहदुर्मदः दिष्ट्यादिष्ट्याभवानद्यममदृष्टिपथंगतः ४ त्वंमातुलेयोनःकृष्णमित्रध्रुङ्मांजिघांससि
अतस्त्वांगदयामंदहनिष्येवज्रकल्पया ५ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणांमित्रवत्सलः बंधुरूपमरिंहत्वाव्या
धिंदेहचरंयथा ६ एवंरूक्षैस्तुदन्वाक्यैः कृष्णंतोत्रैरिवद्विपं गदयाताडयन्मूर्ध्निसिंहवद्व्यनदच्चसः ७

ननु वक्रतुल्यां त्वत् गदां को वा सहेत तेनैव मित्याह अवज्ञकल्पया अत्यल्पया भावदति केवलया नो न्वर्थः ननेवं हननेन कस्तव पुरुषार्थः तदाह तर्हीति अत्र
न विद्यते ज्ञो यस्मात् तत्र सर्वज्ञ इत्यर्थः परमार्थतः स्वामिनं एतद्देहसंबंधेन बंधकत्वं अलक्षणेन शत्रुत्वेन प्रतीतं त्वां हत्वा मित्राणाम् आनृण्यमुपैमि प्राप्नोमि उप
प्यामि विरोधेन अधीयते मनसि चिंत्यत इति व्याधिः तं देहचरं तत्र पीडाजनकत्वात् तथा तं भीष्मं रहत्वा धर्मेण राध्य हत्तेः स्वार्थस्पष्टार्थत्वात् ज्ञाते
ति वातेन यथा पिशाचादीनामार एषस्तुवचनाति तद्विदितत्वात् सैरिसादि प्रतीतमपि प्रायेण तोत्रैरंकुशादिति ७

मा०द०३० वृत्तवधेपिकिं ममेश्वरस्येति चेत्तस्य त्वमेवं तथापि सायाम्नु तं कल्पयिष्यसीत्याशयेनाह ऊः योगेश्वरस्येति मार्कण्डेन आम्नायो ब्रह्मलोकेन ह
७७ तब्रह्मत्वादि तु रूपेणः तथापि तस्यः ब्रह्मस्त्वायाः पावनं प्रायश्चित्तं चेह लोकपावन अनन्तस्त्वोदितः स्वयमेव नवा मम यद्यपि कदि प्यतितर्हिलो
कसंग्रहे ग्रविष्यसि नान्यथेति च यस्मान्निर्वेशं गायश्चित्तं प्रथमे कल्पे मुख्ये कल्पे विधीयमानं उपदिस्यतां किं च वर्तते मन यदेतस्यदीर्घमा
युसत्वबलं इंद्रियं तमाख्याश्च मम यत्र वर्द्धिताम्नासित मपेर्दितं तत्र भूतसर्वं स्वं साधये अस्मादौ अस्मा नाम पाभवेत् अस्माकं च

यथेतद्ब्रह्मस्त्वायाः पावनं लोकपावन । चरिष्यति भवान्लोकसंग्रहो नान्यतोदितः ३२ श्रीभगवानुवाच चरि
ष्ये वधनिर्वेशं लोकानुग्रहकाम्यया । नियमः प्रथमे कल्पे यावान्स तु विधीयतां ३३ दीर्घमायुर्बतैतस्य
य सत्वमिंद्रियमेव च आशासितं यत्तद्भूतं साधयेयोगमायया ३४ ऋषय ऊचुः अस्य त्वमेत
वीर्यस्य नेतोरस्माकमेव च । यथा भवेद्वचस्तंतथा रामविधीयतां ३५ श्रीभगवानुवाच आत्मा वै पुत्र उ
त्पन्न इति वेदानुशासनं तस्माद्स्य भवेद्वक्ता आयुरिंद्रियसत्ववान् ३६ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्य
थ अज्ञानतस्त्वपचितिं यथा मे चिंत्यतां बुधाः ३७

चसत्वं यथा भवेत्तथा विधीयतामित्यर्थः तथा संपादयन्नाह आत्मा वा इति अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि सं
जीव शरदः शतमिति सादिवेदानुशासनं वेदवचनं तस्मादस्मरो मदर्थे लमपुत्रः उ यथा वा भवतो प्राणप्रवक्ता भवेत् आयुरादिमांश्च भवेत् अ
नतरा होदजीवनादस्मत्सम तो सत्वताप्रुत्ररूपेणायुरादिसिद्धेः पुत्र स्वनुस्यापि मन्यतां स्याहितिभावः प्रथमे ब्रवदं तु अर्थं ... दपेक्षितं
कथयत तदहं करिष्यामीत्याहः किं वः कामस्त्विति किं विषयो वः कामो वर्तते तद्ब्रूतेति अथानंतरं अस्मद्ग्रहीत्वा अपचितिं निःकृतिमज्ञानतो मे

ऊर्ध्वः पवनाचार्यमहाविवेकविवरणे १९

अतिमेस्यश्रीरामहर्षणमिति ज्ञात्वा महर्षेर्व्यासस्य सूतं प्रतिलोमजं न कृतं प्रह्वणमंजलिश्च येन तं अध्यासीनं उच्चस्थानस्थं तेभ्यः उच्चासीनमित्यर्थः अजानन्नेवाध्या
स्त इति चकारेण वयमित्याह ऋषेरिति मन्त्रव्याख्या कथं भवं कुर्वन्तत आह अदान्तस्येति गुणाय श्रेयसे चित्तानुशिक्षायै विभाव्य नैधान्तां अन्यथा किं चित्करो तु कं

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः अजिनं च यथान्यायं प्रणम्योत्थाय चार्चयन् २१ सोऽर्चितः सपरीवारः कृतास
नपरिग्रहः रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत २२ अप्रत्युत्थायिनं सूतमकृतप्रह्वणाञ्जलिम् अध्यासीनं च ता
न्विप्रांश्चुकोपोद्वीक्ष्य माधवः २३ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः धर्मपालांस्तथैवास्मान्वधमर्हति दुर्म
तिः २४ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः २५ अदान्तस्याविनी
तस्य वृथा पण्डितमानिनः न गुणाय भवन्ति स्म नटस्येवाजितात्मनः २६ एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः
वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः २७ एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि भावित्वात्तं कुशाग्रेण
करस्थेनाहनत्प्रभुः २८ हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो २९
अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ३० अजानतैवाचरितस्त्व
या ब्रह्मवधो यथा योगेश्वरस्य भवतो नाम्नायोऽपि नियामकः ३१

नवतिस्वैरम् अतस्मात् एतदर्थ इति धर्मध्वजिनः कुल्याभिमानिनः धार्मिका इति आविध्यादिति न हि भावितं केनापि परिहर्तुं शक्यत इत्यर्थः अहनत् अ
हनत् तस्य आधार्मिकत्वमनिशं तत्र कायमनं इति च तत्राह अस्येति गुणाय प्रवचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिन् तद्यथा
दत्तमिति ३१

भा·द·उ·
७८

किंलक्षणः सरः तदाह यतः सरित् आस्रवत् उद्गात् अनुस्रोतेन अनुलोमतः पुलहाश्रमं — महेंद्रे शैले गोमतीगंडकीविपाशायां स्नात्वा शोणे चाप्लुतः

78

ऋषिभिरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ९ अनुस्रोतेन सरयूं प्रयागमुपगम्य
सः स्नात्वा संतर्प्य देवादीन्जगाम पुलहाश्रमम् १० गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः गयां गत्वा पितॄनि
ष्ट्वा गंगासागरसंगमे ११ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च सप्तगोदावरीं वेणीं पंपां भीमरथीं गतः १२ स्कंदं दृ
ष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः १३ कामकोष्णीं पुरीं कांचीं कावेरीं च सरि
द्वराम् श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः १४ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा समुद्रसेतुमगमन्महा
पातकनाशनं १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः कृतमालां ताम्रपर्णीं मलयं च कुलाचलं १६ तत्राग
स्त्यं समासीनं नमस्कृत्याभिवाद्य च योजितस्तेन चाशीर्भिरनुज्ञातो गतोऽर्णवम् १७ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं दद
र्श सः ततः फल्गुनमासाद्य पंचाप्सरसमुत्तमम् १८ विष्णुः संनिहितो यत्र स्नात्वास्पर्शद्गवायुतम् ततोऽभिव्रज्य भग
वान्केरलांस्तु त्रिगर्तकान् १९ गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः
२० तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी २१ मनुतीर्थमुपस्पृश्य प्रभासं
पुनरागमः २२

दृष्ट्वा संस्पृश्य श्रीशैलं श्रीपर्वतं कांचीपुरीं दक्षिणमथुरां विष्णुलोलं अनंतपुरं पंचाप्सरसं सरः अस्पर्शयत् केरलादीन्देशान् द्वैपायनीं यस्मात्तां मनुती
र्थमुपस्पृश्य प्रभासं पुनरागमत् २२

प्रथमं तावदेवेति तं कर्त्तुं कथयंति इत्युक्तस्येति ह्याम्नायाख्ये तमाहुः ततश्च तिपरीत्य सद्रि शोध्य सप्तसमा धानादिगुणा चित्तोध्या ह्येका ह्यमत्रप्रकाम
त्यवेताधः सुसमाहितः कामक्रोधादिरहितः ४० इति श्रीम० भाग० दशम टीका० ७८ ऊनाशीतितमे भागे बल्वलदैत्यवधे निरूप्य तीर्थस्नानादि सूतहत्या

ऋषय ऊ० इल्वलस्य सुतो घोरो बल्वलो नाम दानवः स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ३८ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परं पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं ३९ ततश्च भारतं वर्षं परीत्य सुसमाहितः चरित्वा द्वादशमासांस्तीर्थस्नायी विशुध्यसे ४० इति श्रीभागवते महापुराणे दशमस्कंधे बलदेवतीर्थयात्रायां सूतवधो नाम अष्टसप्ततितमोऽध्याय श्रीशुक उ० ततः पर्वण्युपावृत्ते प्रचंडः पांशुवर्षणः भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः १ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितं अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् २ तं विलोक्य बृहत्कायं भिन्नांजनचयोपमम् तप्ततास्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ३ सस्मार मुशलं रामः परसैन्यविदारणं हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ४ तमाकृष्य हलाग्रेण बल्वलं गगनेचरम् मुशलेनाहनत्क्रुद्धो मूर्द्ध्नि ब्रह्मद्रुहं बलः सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन् मुंचन्नार्त्तस्वरं शैलो यथा वज्रहतोऽरुणः ६ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा ७ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजां रामाय वाससी दिव्ये दिव्यान्याभरणानि च ८

मथानृदत १ उपावृत्ते प्राप्ते अमेध्यो विट्लेपं जनयत्यः पूयमायुस्पतम् अतिकृष्णतरमित्यर्थः तप्ततास्र वह्निरिवाश्मश्रूणि यस्य तं दंष्ट्राभिः उग्रं
भ्रुकुटीयुतं मुखं यस्य तं अरुणः रुधिरलिप्तदेहः शैलो धातुभिः श्रियो धामानि अम्लानानि पंकजानि यस्यां तां ८

अथासीत्तित्मेकृष्णः श्रीदामानं गुहागं तं संपूज्य पृच्छति हि भगवन्कोत्तमित्यादि दुर्थे संगृह्य वासकथां मुदा १ मुरारिसारको हरिः
पुरा चकार संसत्ता अतः पुरं विनैव ते निजोपकारमन्वदते २ राज चोदितो नु श्रुत्वा पुनर्मुकुंदवीर्याणि पृच्छतीह भगवन्नयानीति मिच्छामि सन्न
यः ३ उत्तमश्लोकस्य सत्यो मनोहराः विषयवैतृष्ण्यजनकाः कथाः विशेषज्ञः सारवित् विषादेशानः काममार्गणैः कथाश्रवणेभ्यो वत् दृश्यते चान्या

राजोवाच भगवन्यानि चान्यानि मुकुंदस्य महात्मनः वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामहे प्रभो १ को नु श्रुत्वासकृ
द्ब्रह्मन्नुत्तमश्लोकसत्कथाः विरमेत विशेषज्ञो विषण्णः काममार्गणैः २ सा वाक् यया तस्य गुणान्गृणीते करौ
न च तत्कर्मकरौ मनश्च स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः ३ शिरस्तु तस्योभयलिंगमान
मेत्तदेव यत्पश्यति तद्धि चक्षुः अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं ४ सूत उवाच विष्णुरा
तेन संपृष्टो भगवान्बादरायणिः वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ५ श्रीशुक उवाच कृष्णस्यासीत्स
खा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः विरक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः ६ यदृच्छयोपपन्नेन वर्तमानो
गृहाश्रमी तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ७

नर्थमाह सा वाग्गिति तावेव करौ यौ तत्कर्मकरौ तदेव मनः यत् स्थिरजंगमेषु वसंतं स्मरेत् यः तस्य पुण्याः कथाः शृणोति स एव कर्णः उभयलिंगं स्थिरजंग
मं वत्तस्यैव लिंगमिति मत्वा आनमेत् भगवत्तद्देव शिरः तदेव तत्त्व लिंगमित्येव चक्षुः तान्येवांगानि यानि पादोदकं भजंतीति तन्न यथाविधः कुचैलाकिंचनत्व
त् क्षामा किंचित्तदंप्ययन्नमल्लं तस्यैव परिवेष्टसमं रुधाजीर्णः ८

विनसनं कुरुक्षेत्रे विवक्षुः वक्तुमिच्छुः किं च करिष्यतीति निर्यातः तूष्णीमासन्निति अन्यः पराजयो वा रणः संग्रामः अन्यो वा ... इदं प्राचीनं कर्मस

कि॰ २

श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगं सर्वराजन्यनिधनं भारं मेने हृतं भुवः २२ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृ ७२
धे वारयिष्यन् विनसनं जगाम यदुनंदनः २३ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि अभिवाद्याभवंस्तूष्णीं किं वि
वक्षुरिहागतः २४ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ मंडलानि विचित्राणि चरंताविदमब्रवीत् २५ युवां तुल्यबलौ
वीरौ हे राजन् हे वृकोदर एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् २६ तस्मादेकतरस्येह युवयोः समवीर्ययोः न ल
क्ष्यते जयोऽन्यो वा विरमत्वफलो रणः २७ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् अनुस्मरंतावन्योन्यं दुरुक्तं दुःकृता
नि च २८ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः २९ तं पुनर्नैमिषं प्राप्तम्
ऋषयोऽयाजयन्मुदा क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं ३० तेभ्यो विशुद्धं विज्ञानं भगवान्व्यतरद्विभुः येनैवात्म
न्यदो विश्वमात्मानं विश्वगं विदुः ३१ स्वपत्न्यावभृथस्नातो ज्ञातिबंधुसुहृद्वृतः रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृ
तः ३२ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि ३३ यो नुस्मरेत रामस्य
कर्माण्यद्भुतकर्मणः सायं प्रातरनंतस्य विष्णोः स दयितो भवेत् ३४ इति श्रीभागवते दशमस्कंधे एकोनाशी
तितमः ७९

मुपागतः संगतः क्रत्वंगं यज्ञमूर्तिं ... आत्मनि अधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव विदुः पश्यंति तद्विशुद्धं विज्ञानं व्यतरद्दत्तवान् ३४ इति दशमे एकोनाशीतितमः ७९

समर्हणं उपायनं परुत्स भर्पीपाद्यवनेजनीः धमनिभिः शिराभिः सततं व्याप्तं अवधूतं मलिनं विस्मयमार किमनेनेति हास्यांसम्भ्याः
सम्मानितः सतोः वसतो भस्य पुरी स्वामार्याकृदपरिलीनानवेलिंग हस्यालिंगदर्शनात भोगादर्शनात वसंनायादिवत सन्ः अप्रतिज्ञः

अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणं २० उपहृत्यावनिज्यास्य पादौ पादावनेजनीः अग्रहीच्छिरसा राजन्भ
गवान्लोकपावनः २१ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा २२ अर्चि
त्वावेद्य तांबूलं गां च स्वागतमब्रवीत २३ कुचैलं मलिनं क्षामं द्विजं धमनिसंततम् देवी पर्यचरत्स्वे आमचामरव्य
जनेनवै २४ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्त्तिना विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितम् २४
किमनेन कृतं कर्म अवधूतेन निःस्वता श्रियाहीनेन लोकेस्मिन्गर्हितेनाधनेन च २५ योसौ त्रिलोकगु
रुणा श्रीनिवासेन संस्कृतः पर्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा २६ कथयांचक्रतुर्गाथाः पूर्वाः गुरु
कुलेसतो आत्मनोर्ललिताराजन्करौ गृह्यपरस्परम् २७ श्रीभगवानुवाच अपि ब्रह्मन्गुरुकुलाद्भवव
तालब्धदक्षिणात् समावृत्तेन धर्मज्ञः भार्योढा सदृशी नवा २८ प्रायो गृहेषु ते चित्तमकामविहतं तथा नै
वातिप्रीयसे विद्वन्धनेषु विदितं हि मे २९

धाउद्वाहमनुमतेमत्यस्वहश्रायशतिते चित्ते नूनमकामविहतं कामैविरहितं न भवतीति मे विदितं तथा हि धने पुत्रकलत्रादिषु नैवातिप्रीयसे हे वि ॥ हितिविपुण्यस्लवेलपुत्रकमिति भावः २९

म्लायता शुष्यता सीदमाना अवर्त्तुं नाग संपादना क्लान्त्या च सीदन्ती वेपमाना नवेन च कंपमाना भोजवृष्ण्यंधकेश्वर इति तत्वीकारमात्रेण स
र्वं तदास्यतीति भावः नात्यभीष्टान्नपरिपाकविरसत्वात् अपि तु किमस्तीति प्रश्नः महामगुल्मानि रक्षार्थसैन्यस्थानानि कक्षाः अतोऽ

पतिव्रता पतिं प्राह म्लायता वदनेन सा दरिद्रा सीदमाना वा वेपमानाभिगम्य च ८ ननु ब्रह्मन् हि भगवतः सखा साक्षा
च्छ्रियः पतिः ब्रह्मण्यश्च शरण्यश्च भगवान् सात्वतर्षभ ९ तमुपैहि महाभाग साधूनां च परायणं दास्यति द्रविणं भूरी
सीदते ते कुटुंबिने १० आस्ते धुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः स्मरतः पादकमलमात्मानमपि यच्छति ११
किं त्वर्थकामान् भजतो नात्यभीष्टान् जगद्गुरुः स एवं भार्यया विप्रो बहुशः प्रार्थितो मुहुः १२ अयं हि परमो ला
भ उत्तमश्लोकदर्शनं इति संचिंत्य मनसा गमनाय मतिं दधे १३ अप्यस्त्युपायनं किंचित् गृहे कल्याणि दीयतां
याचित्वा चतुरो मुष्टीन् द्विजान् पृथुकतंडुलान् १४ चैलखंडेन तान् बध्वा भर्त्रे प्रादादुपायनं स तानादाय विप्रा
ग्र्यः प्रययौ द्वारकां किल १५ कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन् इति ध्यानपरो विप्रः कृष्णेन द्वारकां प्रियात्
त्रीणि गुल्मानि तीयाय तिस्रः कक्षाश्च सद्विजः १६ विप्रागम्यांधकवृष्णीनां गृहेष्वच्युतधर्मिणां गृहं द्व्यष्टसहस्राणां
महिषीणां हरेर्द्विजः १७ विवेशैकतमं श्रीमद्ब्रह्मानंदं गतो यथा तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थित
१८ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः प्रीतो व्यमुंचदब्बिंदून्नेत्रा
भ्यां पुष्करेक्षणः १९

अतीताय अतिक्रम्य जगाम सद्विजः द्विजोत्तमः ततश्च आगम्य अंधकवृष्णीनां गृहेषु अंधकारस्य यः स्थितिः ... गृहेषु अच्युतधर्मिणां हरेः द्व्यष्टसहस्राणां
महिषीणां ये गृहाः तेषु च मध्ये श्रीमदेकतमं गृहं विवेश सत्सद्विजो ब्रह्मानंदं गतो यथा तावन्नेवतिरोधः पर्यग्रहीत् परिरंभनं कृतवान् इह

७८

भा० द० ३
८१

किंच अस्माकं गुरुशुश्रूषणं किमपि दैवादेव संपन्नं तदत् किं त्वया स्मर्यत इति पृच्छति अपि न इति गुरौ निवसतामस्माकं यत् १
किमपि वृत्तं तदत् क्वचित् कदाचित् अपर्तौ अपगते ऋतौ अकाल इति वातश्च वर्षं च तयोः समाहारः तदत् स्तनयित्नवो
गर्जितानि चाभवन् निम्नं कूलं नतमुन्नतं च स्थानं अम्बूनां संप्लवे व्याप्तिभ्रमणं यस्मिन्नेकोदके तस्मिन् वने इत्यर्थः परिव

अपि नः स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ गुरुदारैश्चोदितानामिन्धनानयने क्वचित् ३५ प्रविष्टानां महारण्य
मपर्तौ सुमहद्द्विजः वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ३६ सूर्यश्चास्तंगतस्तावत्तमसा चावृता दिशः नि
म्नं कूलं जलमयं न प्राज्ञायत किंचन ३७ वयं भृशं तत्र महानिलाम्बुभिर्निहन्यमाना मुहुरम्बुसंप्लवे दिशोऽ
विदंतोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ३८ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः अ
न्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ३९ अहो हे पुत्रिकाः यूयं अस्मदर्थेऽतिदुःखिताः आत्मा वै
प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ४० एतदेव हि सच्छिष्यैः कर्त्तव्यं गुरुनिष्कृतं यद्वै विशुद्धभावेन सर्वा
र्थात्मार्पणं गुरौ ४१ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः छंदांस्ययातयामानि भवंत्विह परत्र
च इत्थंविधान्यनेकानि वशतां गुरुवेश्मसु ४२॥

भ्रिम भ्रमणं अभ्रमरणे इत्यस्माज्ज्ञातो परिपरितो वभ्रिम इडागमश्छांदसः आतुरान् दुःखितवेत इत्यर्थः उवाच कृपया एतां कृत
ज्ञी यथावयं कृतार्थाः इत्याह आत्मा देह इति गुरोर्निःकृतिं प्रत्युपकारः सर्वे अर्था यस्मात्स आत्मा देहं तस्यार्पणं विनियो
गः अयातयामानि यातो याता यामो यस्य पक्वस्यान्नस्य तत् कृतसारं भवति तद्वदन्यदपि गतसारं गौण्या वृत्त्या यातयाम
मित्युच्यते अगतसाराणि छंदांसि मत्तोऽध्ययमानानि भवंत्वित्यर्थः इत्थंविधानि एवंप्रकाराणि अनेकानि वृत्तानि किं

राम
८१

कामहतत्वाभावे किं गृहधर्मक्लेशेनेत्याशंक्याह केचिदिति दैवीरीश्वरमायारचिताः प्रकृतीर्विषयवासनाः त्यजंतः कामैरनाकृष्ट
चेतसामपि कर्मकरणे दृष्टांतः यथाहमिति लोकसंग्रहं लोकस्य संग्रहो ग्रहणं यथा भवति तथाहमीश्वरोपि कर्माणि यथा करोमि
तद्वत् नौ आवयोः यतो गुरोर्विज्ञेयं परमात्मतत्वं तमसः संसारस्य तत्रात्मज्ञानप्रदस्य गुरोरत्यंतं पूज्यत्वं वक्तुं पुरुषस्य त्रीन्
गुरूनाह सवा इति इह संसारे यत्र संभवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः कर्मविद्याप्रदं गुरुमाह द्विजातेः सतः
पुंसः सत्कर्मणां यत्र संभवः उपनीय वेदाध्यापक इत्यर्थः यथाहमीश्वरः तथा प्रथमादपि पूज्यः इत्यर्थः तद्द्वितीयो गुरुः ब्रह्म

केचित्कुर्वंति कर्माणि कामैरहतचेतसः त्यजंतः प्रकृतीर्दैवीर्यथाहं लोकसंग्रहम् ३० कच्चिद्गुरुकुले वासं ब्रह्म
न्स्मरसि नौ यतः द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ३१ स वै सत्कर्मणां साक्षाद्द्विजातेरिह संभवः आ
द्योंग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ३२ नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ये मया गुरुणा वाचा
तरंत्यंजो भवार्णवं ३३ नाहमिज्याप्रजातिभ्यां तपसोपशमेन च तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ३४

विद्याप्रदं गुरुमाह आद्य इति अंग आश्रमिणां सर्वेषामपि ज्ञानदो यः स गुरुः साक्षादहमेवेति अतः तज्ज्ञानप्रदं गुरुरूपं मामाश्रित्य
ये संसारं तरंति ते बुद्धिमंत इत्याह नन्विति हे ब्रह्मन् तेन नु वर्णाश्रमवतां मध्ये अर्थकोविदाः इह मनुष्यजन्मनि तत्रापि वर्णा
श्रमत्वे सति ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणांजः सुखेनैव भवार्णवं तरंति ज्ञानप्रदाद्गुरोरधिकः से
व्यो नास्तीत्युक्तं अत एव तद्भजनादधिको धर्मो नास्तीत्याह नाहमिति ईज्या गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपन
यनं तेन ब्रह्मचारिधर्म उपलक्ष्यते तपसा वानस्थधर्मेणोपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयं
यथा सर्वभूतात्मापि गुरुशुश्रूषयेति ३४

भा॰द॰उ॰ ऽतिजीर्णत्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बद्धान् ऽअंगहे स्वे ऽपि विश्वं मां विश्वात्मानं इति वदन्नेको मुष्टिं जग्धा तस्मै ऽतिप्र
८२ यं भावः एतावता पुंस इहामुत्र चमत्कृत्या हि विलासभृतानां सर्वसंपदां समृद्धये ऽलं ऽअतः परं द्वितीयमुष्ट्यदनेन मामेतदधीनां
करोषि किं त्वत्तोषकारणं नवतो ऽस्य कारणं यथा भवेत्तथा सर्वसंपत्समृद्धये यां भक्तस्य स्वसमृद्धिं दत्वा त्वं तुष्टोऽसि स्पर्धः स्वर्गतं स्व

इत्थं विचिंत्य वसनात्चीरबद्धान्द्विजन्मनः। स्वयं जहार किमिदमिति पृथुकतंडुलान् ८ नन्वेतदुपनीतं मे परमप्रीण
नं सखे। तर्पयंत्यंग मां विश्वमेते पृथुकतंडुलाः ९ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे। तावच्छ्रीर्जगृहे
हस्तं तत्परा परमेष्ठिनः १० एतावतालं विश्वात्मन् सर्वसंपत्समृद्धये। अस्मिंल्लोकेऽथवामुष्मिन् पुंसस्त्व
त्तोषकारणं ११ ब्राह्मणस्तां तु रजनीमुषित्वाच्युतमंदिरे। भुक्त्वा पीत्वा सुखं मेने ऽात्मानं स्वर्गतं य
था १२ श्वोभूते विश्वभावेन स्वसुखेनाभिवंदितः। जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः १३॥
स चालब्ध्वा धनं कृष्णान्न तु याचितवान् स्वयं। स्वगृहान्व्रीडितो गच्छन् महद्दर्शननिर्वृतः १४॥
अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया। यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि १५ क्वाहं द॰
रिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः। ब्रह्मबंधुरिति स्माहं बाहुभ्यां परिरंभितः १६॥श्रीहरिहरः।

गवासिनं स्वीकृते उद्दिते रवौ विश्वं भावयतीति विश्वभावः तेन इति पुरतो भाविनमिदं दुर्लभं विभवं सूचयति स्वसुखेन स्वानंद
पूर्णेनेति दानेऽदीनतां दर्शयति नंदितो विनयोक्तिभिः व्रीडितः स्वचित्ते कार्पण्यरूपेन लज्जितः महतः श्रीकृष्णस्य दर्शनेन नि
र्वृतः निर्वृतिमेवाह अहो इति चतुर्भिः यतः लक्ष्मीमुरसि बिभ्रता ऽाश्लिष्टोऽहं पापीयान् नीचः १६ श्रीराधाहरिःजी। राम॰
८२

फलितमुपसंहरति गुरोरिति ४३ अस्माभिः किमनिर्वृत्तं असंपन्नं येषामस्माकं भवता सहवासोऽभूत् तत्र भवतस्तु सर्वमेतद्विडंब
नमात्रमित्याह यस्येति छंदोमयं वेदाख्यं ब्रह्म तत्पाप्त्येयस्य आवपनं उद्भवस्थानं देहो मूर्त्तिर्यस्य तस्य तत्र ४५ इति दश
मेऽशीतितमोऽध्यायः एकाशीतितमे सख्युः आह्वाय पृथुकतंडुलान् श्रियं निर्मितवान्निंद्रदुर्लभां तु तदाश्रमे १ संकथय

गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशांतये ॥ ४३ ॥ ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो भवता
सत्यकामेन येषां वासो गुरावभूत् ४४ यस्यच्छंदोमयं ब्रह्म देह आवपनं विभो श्रेयसां तस्य गुरुषु वासो
ऽत्यंतविडंबनम् ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे भगवद्ब्राह्मणसंवादेऽशीतितमोऽध्यायः
॥ ८० ॥ श्रीशुक उवाच ॥ स इत्थं द्विजमुख्येन सह संकथयन्हरिः सर्वभूतमनोभिज्ञः स्मयमान उवाच तं १
ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियं प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः २ श्री
भगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्य्येव मे भवेत् ३ भूर्य्य
प्यभक्तोपहृतं न मे तोषाय कल्पते पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ४ तदहं भक्त्युपहृतमश्नामि प्रयतात्म
नः इत्युक्तोपि द्विजस्तस्मै व्रीडितः पतये श्रियः ५ पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः सर्वभूतात्मदृक् साक्षी
तस्यागमनकारणं ६ विज्ञायाचिंतयन्नायं श्रीकामो माभजत्पुरा पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया प्रा
प्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ७ ॥

न्सुखगोष्ठीं कुर्वन्सर्वभूतानां मनसोऽभिज्ञः मदर्थं पृथुकानानीय दातुं लज्जित इति जानन्निस्मर्थः प्रहसन्स्वे
त्वीकुर्वन्लज्जया अकथयतस्तामपनुदन्नाह अण्वपीति द्वाभ्यां सर्वभूतानामात्मदृक् अंतःकरणसाक्षी अमर्त्या
नां देवानामपि दुर्लभाः ७ ॥

वुध्यात्मयमेवंवंपद्इति निश्चयेन मनसा संकल्पेन यत्र मंदिरे पयःफेननिभाः शय्याः आस्तरणानीत्यादि
संपदः तत्र सर्वसंपदां समृद्धिं विलोक्य तर्कयामासेति च तुर्थेनान्वयः यत्र च पीताः गजदंतमयाः पर्यंकाः।

।पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाश्रुलोचना मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे २७ पत्नीं वी
क्ष्य विस्फुरंतीं देवीं वैमानिकीमिव दासीनां निष्ककंठीनां मध्ये भातीं सविस्मितः २८ प्रीतः स्वयं तया
युक्तः प्रविष्टो निजमंदिरं मणिस्तंभशतोपेतं महेंद्रभवनं यथा २९ पयःफेननिभाः शय्याः दांताः
रुक्मपरिच्छदाः पर्यंका हेमदंडानि चामरव्यजनानि च ३० आसनानि च हैमानि मृदूपस्त
रणानि च मुक्तादामविलंबीनि वितानानि द्युमंति च ३१ स्वच्छस्फटिककुड्येषु महामरकते
षु च रत्नदीपा भ्राजमाना ललना रत्नसंयुताः ३२ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसं
पदां तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीम् ३३ नूनं बतैतन्मम दुर्भगस्य
शश्वद्दरिद्रस्य समृद्धिहेतुः महाविभूतेरवलोकतोन्यो नैवोपपद्येत यदूत्तमस्य ३४॥

यत्र आसनानि च मृदूनि उपस्तरणानि तुलादिमयानि येषु तानि यत्र च मुक्तादामविलंबंति द्युमंति च वि।
तानानि निर्व्यग्रः संस्थिरः सन् अहैतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास कुत एषा समृद्धि
रागतेति निश्चिनोति नूनमिति एतन्मे तिरेषचासावहं च तस्य एतन्ममहमहती विभूतिर्यस्य तस्यावलो

पूजितश्चंदनलेपनादिभिः एवं संपूज्यापि धनस्यादाने कारणं कल्पयति स्वर्गापवर्गयोरिति द्वाभ्यां स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुण्यकत्वाद् भूर्यपि धनं मह्यं नाददात् निजगृहस्यांतिकं प्राप्तः तस्य विशेषणं सूर्येति विचित्रोपवनादिभिश्च वृतम् कथंभूतैः कूजद्भिर्द्विजकुलैः पक्षिसमूहैः आकुलैः आप्तैः तथा प्रोत्फुल्लानि कुमुदादी

निवासितः प्रियाजुष्टे पर्यंके ऽनरीयथा महिष्यावीजितः श्रान्तो वालव्यजनहस्तया १८ शुश्रूषयापरमया
पादसंवाहनादिभिः पूजितो देवदेवेन विप्रदेवेन देववत् १९ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां स
र्वासामपि सिद्धीनां मूलं तच्चरणार्चनं २० अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् इति कारुणि
को नूनं धनं मेऽभूरि नाददात् २१ इति तच्चिंतयन्नंतः प्राप्तो निजगृहांतिकं सूर्यानलेंदुसंकाशैः विमानैः स
र्वतो वृतम् २२ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः प्रोत्फुल्लकुमुदांभोजकह्लारोत्पलवारिभिः
२३ जुष्टं स्वलंकृतैः पुंभिः स्त्रीभिश्च हरिणाक्षिभिः किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् २४ ए
वं मीमांसमानं तं नरा नार्योऽमरप्रभाः प्रत्यगृह्णन् महाभागं गीतवाद्येन भूयसा २५ पतिमागतमाकर्ण्य पत्न्यु
द्धर्षातिसंभ्रमा निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् २६ ॥

नियेषु तानि वारीणि येषु तानि तथा तैः किंच जुष्टमिति हरिणीनामिवाक्षीणि यासां ताभिः तदैश्वर्यं दृष्ट्वा वितर्कितवान् तदाह किमिदमिति प्रत्यगृह्णन् जनाः पूजां चक्रुः किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य वेति स्थानं च स्वीयमिति ज्ञात्वा कथं तदिदं स्थानं इति एवंरूपमभूदिति अमरप्रभाः तत्तुल्यकांतयः प्रत्यगृह्णन् उपायनादिभिरादृतवंतः उद्धर्षा उद्गतो हर्षो यस्याः सा अतिसंभ्रमः आदरो यस्याः सा आलयात् कमलवनात् रूपधारिणी श्रीरिव स्वर्गस्य तत्र भगवता आनीतत्वात् स्वर्गिणीमि
वतयोः रूपं वभूवेति भावः २६

भा॰द॰उ॰ ८५ ष्टन्नद्र शनैः शनैः। सा गमम्भस्पन्नत तज्ञा यथास ह बुभुजे श्रीकृष्णस्यैवं ब्रह्मण्यता नातिचित्रमित्याह। तस्येति। अन्यैरजित।
